



आज़ादी का अमृत महोत्सव

# संस्कृतभाषा अभ्यासपुस्तिका

## वेदभूषणद्वितीयवर्षम् / प्रथमा द्वितीयवर्षम् / कक्षा सप्तमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम! मामुद्धर ॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
आत्मा वै जायते पुत्रः पुत्रेण दुहिता समा ।
अनुव्रतः पितुः पुत्रो माता भवतु सम्मनाः ।
अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत् ।
स्वाध्यायाभ्यासनं चैव वाङ्मयं तप उच्यते ।
सर्वे गुणाः काञ्चनमाश्रयन्ति ।

















महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# प्रथमः पाठः

## देववैद्यः धन्वन्तरिः (लट्, लङ्, लृट् परस्मैपदी, आत्मनेपदी, लोट् परस्मैपदी)

प्राचीनकाले दुर्वासा ऋषिः इन्द्रस्य दर्शनार्थम् अमरावतीनगरम् **अगच्छत्** परन्तु इन्द्रः मुनिवरं दुर्वाससं न **अनमत्।** अतः स महर्षिः कुपितो **भूत्वा अशपत्।**

असुराः विषयम् **अजानत** इन्द्रलोकम् **आक्रामन्** देवान् **पराजयन्त।** तदा असुराः अमरावतीपुरः लुण्ठनम् **अकुर्वन्,** यज्ञान् मण्डपादीन् च **अनाशयन्।** देवाः असुरैः दत्तां पीडां सोढुं न **अशक्नुवन्।** सर्वे मिलित्वा ब्रह्मणः समीपम् **अगच्छन्।** किन्तु ब्रह्मा **अवदत्-** भवतां समस्याम् अहं समाधातुं न **शक्नोमि।** भवन्तः श्रीनारायणं निकषा **गच्छन्तु** इति।

ततः देवाः क्षीरसागरम् आगत्य नारायणम् **अस्तुवन्।** तदा श्रीनारायणः **अब्रवीत्** – भवन्तः महर्षेः दुर्वाससः अपमानम् **अकुर्वन्।** अतः युष्माकम् एषा दुःस्थितिः **आपतत्।** आदौ असुरैः सह सन्धिं **कुर्वताम्।** ततः भवन्तः देवासुराः मिलित्वा क्षीरसागरस्य मन्थनं **कुर्वन्तु।** ततः अमृतं लभ्यते। तदमृतं भवन्तः पिबन्ति चेत् भवतां कष्टम् **अपगमिष्यति।**

देवाः गुरोः बृहस्पतेः अध्यक्षतायां राक्षसैः सह सन्धिप्रस्तावम् **अकुर्वन्।** असुराणां समक्षं समुद्रमन्थनस्य विषयं **प्रास्तुवन्।** असुराः एतं प्रस्तावम् **अङ्गीकुर्वन्।** अमृते उभयपक्षयोः सहभागः **भवतु** इति सर्वे निश्चितवन्तः।

वैनतेयः मन्दरपर्वतम् **आनयत।** असुराः वासुकिनागम् **आनयन्त।** एषः वासुकिनागः मन्थनस्य रज्जुः **आसीत्।** असुराः वासुकिनागस्य मस्तके **अगृह्णत** एवं देवाः तस्य पुच्छे **अगृह्णन्।** मन्दरः समुद्रस्य अन्तः **अगच्छत्।** विष्णुः कूर्मरूपं धृत्वा पर्वतम् **उदनयत्।**

आरम्भे विषम् आगतम्। शिवः विषम् **अपिबत्।** तस्य कण्ठः विषेण नीलवर्णः **अभवत्।** तस्मात् तस्य नाम 'नीलकण्ठः' इति प्रख्यातम् **अभवत्।** अनन्तरं बहुविधानि अमूल्यवस्तूनि लब्धानि। अन्ते विष्णुः देववैद्य-धन्वन्तरिरूपेण समुद्रस्य उपरि **समुदतिष्ठत्।**

तस्य हस्ते अमृतकलशः **आसीत्।** तम् अमृतकलशं राक्षसाः **अहरन्।** तदा देवासुराः परस्परं कलहम् आरब्धवन्तः। कलहनिवारणाय विष्णुः मोहिनीरूपं धृत्वा तत्रागत्य **अवदत्** – सर्वे देवाः असुराः च पङ्क्तौ **उपविशन्तु** इति। देवाः असुराः च पङ्क्तौ **उपाविशन्।** मोहिनीरूपः विष्णुः आदौ देवानां पङ्क्तौ अमृतवितरणम् **आरभत।** असुराणां गणे राहुनामकः कश्चन असुरः देवरूपं धृत्वा देवानां पङ्क्तौ **उपाविशत्।** अतः देवैः सह राहुः अपि अमृतम् **अपिबत्।** एतत् विष्णुः **अजानात्।** तदानीं सः राहोः ग्रीवां सुदर्शनचक्रेण **अकर्त्तयत्।** अमृतं पीतवतः देवान् असोढ्वा असुराः तैः सह युद्धं **प्रारभन्त।** युद्धे देवाः **अजयन्।**

**अभ्यासप्रश्ना:**

1. कृ-गम्-शक्-धातोः लङ्-लकारस्य आत्मनेपदस्य रूपाणि लिखत।
2. इन्द्रस्य नगरस्य नाम किम् ?
3. समुद्रमन्थनं के कृतवन्तः ?
4. देववैद्यः धन्वन्तरेः उत्पत्तिविषये लघुनिबन्धं लिखत।

# द्वितीयः पाठः

## सम्भाषणम्

### (लोट्, आत्मनेपदपरिचयः, इ/ईकारान्तस्त्रीलिङ्गम्)

अर्जुनः - हे गौरि ! मम पुस्तकं **दत्ताम्**।

गौरी - अस्तु। **स्वीकुरुताम्**।

अर्जुनः - धन्यवादः। **भवती** पुस्तकम् अपठत् वा ?

गौरी - आम्। पुस्तकम् अतीव उपयोगि वर्तते। तत्र एकः पाठः मह्यम् अतीव अरोचत। तत् भवान् अपि एकवारम् **अधीताम्**।

अर्जुनः - अस्तु तावत्। पाठस्य नाम **ब्रूताम्**।

गौरी - श्रद्धावान् लभते ज्ञानम् इति पाठः।

अर्जुनः - अस्तु ! तर्हि अहमपि तं पाठम् **अध्ययै**।

गौरी - अस्तु। तर्हि पुनर्मिलामः।

अर्जुनः - अस्तु। तर्हि अहम् अधुना पाठशालां गच्छामि। (पाठशालां प्राप्य), (सहपाठिभिः सह मिलित्वा सर्वेऽपि गुरोः समीपं गच्छन्ति) अभिवादयामहे गुरो !

गुरुः - कल्याण**मास्ताम्**। **वर्धध्वम्**। यशो **लभध्वम्**। यूयम् आदौ देवीं सरस्वतीं **वन्दध्वम्**। तदनन्तरम् अहम् अध्यापयिष्यामि। ......

गुरुः - अस्तु। भवन्तः स्व-स्व-आसने **आसताम्**। अद्य वयम् -

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण ! रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥**

इति श्लोकं पठामः।

**अभ्यासप्रश्नाः**

1. ब्रू-कृ-वद्-दा-धातोः लोट्लकारस्य आत्मनेपदस्य रूपाणि लिखत।
2. मति-सखी-घटी-शब्दानां रूपाणि सप्तसु विभक्तिषु लिखत।
3. सम्भाषणम् इति पाठे प्रयुक्तानां पात्राणां नामानि लिखत।
4. निम्नलिखितानां पदानां सन्धिविच्छेदं कुरुत- अतीवोपयोगि, इत्यपि, ग्रीष्मावकाशः, तत्रैव।

# तृतीयः पाठः

# कारकम्

## कर्तृकारकम्, कर्मकारकम्, उपपदविभक्तिश्च

वाक्ये क्रियया सह यस्यान्वयः तदेव कारकम्। अर्थात् क्रियाजनकत्वं, क्रियान्वयित्वं, क्रियानिष्पादकत्वं च कारकत्वम्। कस्मिन् कारके का विभक्तिः भवति इति पाणिनिना सूत्रैः निर्दिष्टम् अस्ति। कारकस्य ज्ञानाभावे वाक्यप्रयोगे दोषाः भवेयुः। पाणिनीयव्याकरणे षट् कारकाणि भवन्ति। यथा- कर्तृकारकम्, कर्मकारकम्, करणकारकम्, सम्प्रदानकारकम्, अपादानकारकम्, अधिकरणकारकञ्चेति। एतेषु कारकेषु कर्तृकारकं क्रियया साक्षात् अन्वेति। अन्यानि कारकाणि तु परम्परया क्रियया अन्वयं प्राप्नुवन्ति।

### प्रथमाविभक्तिः

**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** *(२.३.४६)*

**पदविभागः -** प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे (सप्तम्येकवचनम्), प्रथमा (प्रथमैकवचनम्)

**वृत्तिः -** नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे सङ्ख्यामात्रे च प्रथमा स्यात्।

**उदाहरणानि -** **प्रातिपदिकार्थे** - उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम्। **लिङ्गमात्राधिक्ये** - तटः - तटी - तटम्। **परिमाणमात्रे** - द्रोणो व्रीहिः। **वचनमात्रे** - एकः, द्वौ, बहवः।

**सम्बोधने च** *(२.३.४७)*

**पदविभागः -** सम्बोधने (सप्तम्येकवचनम्), च (अव्ययम्)।

**वृत्तिः -** इह प्रथमा स्यात्। सम्बोधनं नाम अभिमुखीकृत्य बोधनं सम्यक् बोधनं वा इति।

**उदाहरणम् -** हे कृष्ण ! हे सीते ! हे देवि ! हे पितः ! हे गुरो ! हे श्रीमन् !

### कर्तृकारकम्

**स्वतन्त्रः कर्ता** *(पा.सू. १.४.५४)*

**पदविभागः -** स्वतन्त्रः (प्रथमैकवचनम्), कर्ता (प्रथमैकवचनम्)।

**वृत्तिः -** क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।

**उदाहरणानि -** १. **रामः** ग्रन्थम् अधीते। २. **दिनेशः** संस्कृतं पठति। ३. **त्वम्** अर्हसि। ४. **अहं** श्लोकं रचयामि।

**तत्प्रयोजको हेतुश्च** *(पा.सू. १.४.५५)*

**पदविभागः -** तत्प्रयोजकः (प्रथमैकवचनम्), हेतुः (प्रथमैकवचनम्), च (अव्ययम्)।

**वृत्तिः -** कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्।

**उदाहरणानि -** १. देवदत्तः कटं करोति, तं यज्ञदत्तः प्रयुङ्क्ते, **यज्ञदत्तः** देवदत्तेन कटं कारयति।
२. **गुरुः** शिष्यान् वेदम् अध्यापयति।

## कर्मकारकम्

**कर्तुरीप्सिततमं कर्म** *(पा.सू. १.४.४९)*

**पदविभागः-** कर्तुः (षष्ठी-एकवचनम्), ईप्सिततमम् (प्रथमैकवचनम्), कर्म (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्।

**उदाहरणम् -** शिशुः चन्द्रं पश्यति। अत्र शिशोः (कर्तुः) दर्शनरूपक्रियया चन्द्रः इष्टतमः भवति, अतः चन्द्रम् इति पदस्य कर्मसंज्ञा अभवत्।

## द्वितीयाविभक्तिः

**कर्मणि द्वितीया** *(पा.सू. २.३.२)*

**पदविभागः -** कर्मणि (सप्तमी-एकवचनम्), द्वितीया (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव। अभिधानं तु प्रायेण तिङ्-कृत्-तद्धितसमासैः। तिङ् - हरिः सेव्यते। कृत् - लक्ष्म्या सेवितः। तद्धितः - शतेन क्रीतः शत्यः। समासः - प्राप्त आनन्दो यं स प्राप्तानन्दः।

**उदाहरणम् -** शिष्यः वेदम् अधीते। अत्र 'अधीते' इति क्रियापदेन वेदपदं नोक्तम्, अतः 'वेदम्' इत्यत्र प्रकृतसूत्रेण द्वितीयाविभक्तिः अभवत्।

**तथायुक्तं चानीप्सितम्** *(पा.सू. १.४.५०)*

**पदविभागः -** तथा (अव्ययम्), युक्तम् (प्रथमैकवचनम्), च (अव्ययम्), अनीप्सितम् (प्रथमैकवचनम्)। चतुष्पदात्मकं सूत्रमिदम्।

**वृत्तिः -** ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छन् तृणं

स्पृशति। ओदनं भुञ्जानो विषं भुङ्क्ते।

**उदाहरणानि -** वेदपाठशालां गच्छन् वृक्षान् पश्यति। अत्र वृक्षाणां दर्शनम् अनीप्सितं भवति, अतः अनीप्सितमपि वृक्षपदं प्रकृतसूत्रेण कर्मसंज्ञां प्राप्नोति।

**अकथितञ्च** *(पा.सू. १.४.५१)*

**पदविभागः -** अकथितम् (प्रथमैकवचनम्), च (अव्ययम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः -** अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

**दुह्-याच्-पच्-दण्ड-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्।**
**कर्मयुक्-स्यादकथितं तथा स्यान्नी-हृ-कृष्-वहाम् ॥**

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्म इति परिगणनं कर्तव्यमित्यर्थः। अर्थनिबन्धेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि। कारकं किम् ? माणवकस्य पितरं पन्थानं पृच्छति। "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्" (वार्तिकम्)। कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते।

**उदाहरणानि -**

| अपादानादिकारकम् | अपादानादिविशेषैः अविवक्षितं कारकम् (अकथितञ्च, द्वितीया) |
|---|---|
| **गोः दोग्धि पयः। (अपादानम्)** | गां दोग्धि पयः। |
| **बलेः याचते वसुधाम्। (अपादानम्)** | बलिं याचते वसुधाम्। |
| **तण्डुलैः ओदनं पचति। (करणम्)** | तण्डुलान् ओदनं पचति। |
| **गर्गेभ्यः शतं दण्डयति। (अपादानम्)** | गर्गान् शतं दण्डयति |
| **व्रजे अवरुणद्धि गाम्। (अधिकरणम्)** | व्रजम् अवरुणद्धि गाम्। |
| **माणवकात् पन्थानं पृच्छति। (अपादानम्)** | माणवकं पन्थानं पृच्छति। |
| **वृक्षात् अवचिनोति फलानि। (अपादानम्)** | वृक्षम् अवचिनोति फलानि |
| **माणवकाय धर्मं ब्रूते। (सम्प्रदानम्)** | माणवकं धर्मं ब्रूते। |
| **माणवकाय धर्मं शास्ति। (सम्प्रदानम्)** | माणवकं धर्मं शास्ति। |
| **देवदत्तात् शतं जयति। (अपादानम्)** | देवदत्तं शतं जयति। |
| **सुधायाम् क्षिरनिधौ मथ्नाति। (अधिकरणम्)** | सुधां क्षिरनिधिं मथ्नाति। |

| | |
|---|---|
| **देवदत्तात् शतं मुष्णाति। (अपादानम्)** | देवदत्तं शतं मुष्णाति |
| **ग्रामे अजां नयति, हरति, कर्षति, वहति। (अधिकरणम्)** | ग्रामम् अजां नयति, हरति, कर्षति, वहति। |

### अधिशीङ्स्थाऽऽसां कर्म *(पा.सू. १.४.४३)*

**पदविभागः -** अधिशीङ्स्थाऽऽसाम् (षष्ठी-बहुवचनम्), कर्म (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः।

**उदाहरणानि -** अधिशेते कैलाशं शिवः। अधितिष्ठति वैकुण्ठं हरिः। अध्यास्ते सत्यलोकं ब्रह्मा।

### अभिनिविशश्च *(पा.सू. १.४.४७)*

**पदविभागः -** अभिनिविशः (प्रथमैकवचनम्), च (अव्ययम्)। द्विपदं सूत्रम्।

**वृत्तिः -** अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गम्।

**उदाहरणानि -** अभिनिविशते सन्मार्गम्। सन्मार्गे आग्रहवान् इत्यर्थः। अत्र सन्मार्गः भवति अभिनिपूर्वकविश्-धातोः आधारः, अतः तत्र प्रकृतसूत्रेण कर्म अभवत्।

### उपान्वध्याङ्वसः *(पा.सू. १.४.४८)*

**पदविभागः -** उपान्वध्याङ्वसः (षष्ठी-एकवचनम्)।

**वृत्तिः -** उपादिपूर्वस्य वसतेराधारः कर्म स्यात्। उपवसति, अनुवसति, अधिवसति, आवसति वा वेकुण्ठं हरिः। अभुक्त्यर्थस्य न (वार्तिकम्)। वने उपवसति। वने उपवासं करोति इत्यर्थः।

**उदाहरणानि -** उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः। अत्र उपादिपूर्वकस्य वस्-धातोः आधारः भवति वैकुण्ठः, अतः प्रकृतसूत्रेण तत्र कर्म अभवत्।

## उपपदविभक्तिः (द्वितीया)

### अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि *(वार्तिकम्)*

**पदविभागः -** अभितः परितः समयानिकषाहाप्रतियोगे (सप्तमी-एकवचनम्), अपि (अव्ययम्)। द्विपदं वार्तिकम्।

**वार्तिकार्थः -** अभितादिभिः शब्दैः योगे द्वितीयाविभक्तिः स्यात्।

**उदाहरणानि -** **अभितः** - अभितः उपाध्यायम्। उपाध्यायस्य पुरतः इत्यर्थः।

**परितः** - परितः विद्यालयम्। विद्यालयस्य चतुर्षु पार्श्वेषु इत्यर्थः।

**समया** - वेदपाठशालां समया। वेदपाठशालायाः समीपे इत्यर्थः।

**निकषा** - गुरुं निकषा। गुरोः निकटे इत्यर्थः।

**हा** - हा नास्तिकम्। नास्तिकस्य विषादः दुःखं वा इत्यर्थः।

**प्रति** - बुभुक्षितं न प्रतिभाति किञ्चित्। यः बुभुक्षितः अस्ति तस्य बुद्धौ किमपि न स्फुरति बुभुक्षाकारणात् इत्यर्थः।

**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**

**द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥**

**वार्तिकार्थः** - उभयतः, सर्वतः, धिक्, उपरि-उपरि, अधि-अधि, अधोऽधः, इत्येतैः शब्दैः योगे द्वितीयाविभक्तिः स्यात्।

**अन्तरान्तरेण युक्ते** *(पा.सू. २.३.४)*

**पदविभागः** - अन्तरा-अन्तरेण (अव्ययम्), युक्ते (सप्तमी-एकवचनम्)।

**वृत्तिः** - आभ्यां योगे द्वितीया स्यात्। अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।

**उदाहरणानि** - अन्तरा त्वां माम् आचार्यः। तव मम मध्ये आचार्यः इत्यर्थः। अन्तरेण वेदार्थज्ञानं न सुखम्। वेदार्थज्ञानं विहाय सुखं नास्ति इत्यर्थः।

**कर्मप्रवचनीययुक्ते द्वितीया** *(पा.सू. २.३.८)*

**पदविभागः** - कर्मप्रवचनीय-युक्ते (सप्तमी-एकवचनम्), द्वितीया (प्रथमैकवचनम्)। द्विपदं सूत्रम्।

**वृत्तिः** -एतेन योगे द्वितीया स्यात्। जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ इति तृतीयाऽनेन बाध्यते। लक्षणेत्थंभूत (सू.) इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्।

**अनुर्लक्षणे** *(पा.सू. १.४.८४)*

**पदविभागः** - अनुः (प्रथमैकवचनम्), लक्षणे (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** - लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात्। गत्युपसर्गसंज्ञाऽपवादः।

**उदाहरणानि** - जपमनु प्रावर्षत्। लक्षणं नाम हेतुः इति। अत्र वर्षणस्य हेतुः जपः इति। स च हेतुः अनु इत्यनेन ज्ञायते। अतः अनु इत्यस्य कर्मप्रवचनीयसंज्ञा अभूत्। कर्मप्रवचनीयेन योगे 'जपम्' इत्यत्र 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण द्वितीयाविभक्तिः।

**हीने** *(पा.सू. १.४.८६)*

**पदविभागः** - हीने (सप्तमी-एकवचनम्)। एकपदं सूत्रम्।

**वृत्तिः** - हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः।

**उदाहरणम् -** अनु आस्तिकान् नास्तिकाः। आस्तिकेभ्यः हीनाः निकृष्टाः वा नास्तिकाः इत्यर्थः। 'आस्तिकान्' इत्यत्र 'कर्मप्रवचनीययुक्ते' द्वितीया इति सूत्रेण द्वितीयाविभक्तिः। अनु हरिं सुराः। हरेः अपेक्षया हीनाः देवताः इत्यर्थः।

**उपोऽधिके च** *(पा.सू. १.४.८७)*

**पदविभागः -** उपः (प्रथमैकवचनम्), अधिके (सप्तम्येकवचनम्), च (अव्ययम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात्। अधिके सप्तमी वक्ष्यते। हीने - उप हरिं सुराः।

**उदाहरणम् -** उप विदुषः मूढाः। विद्वद्भ्यः हीनाः निकृष्टाः वा मूर्खाः इत्यर्थः।

**कालाध्वनोरत्यन्तसंयोगे** *(पा.सू. २.३.५)*

**पदविभागः -** कालाध्वनोः (सप्तमी-द्विवचनम्), अत्यन्तसंयोगे (सप्तमी-एकवचनम्)। द्विपदं सूत्रम्।

**वृत्तिः -** इह द्वितीया स्यात्। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। अत्यन्तसंयोगे किम् ? मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।

**उदाहरणानि -** **गुणक्रियाद्रव्यैः कालवाचकस्य।** यथा - **गुणः** - मासं कल्याणी। एकमासं यावत् मङ्गलवती इत्यर्थः। **क्रिया** - सप्तवर्षाणि वेदम् अधीते। सप्त वर्षाणि यावत् निरन्तरं वेदं पठति इत्यर्थः। अधीते इति क्रियया सह सप्त वर्षाणि इत्यस्य अत्यन्तसंयोगे द्वितीयाविभक्तिः। **द्रव्यम्** - मासं गुडधानाः। मासे प्रतिदिनं निरन्तरं गृहे गुडधानाः भवन्ति इत्यर्थः।

**गुणक्रियाद्रव्यैः अध्ववाचकस्य।** यथा - **गुणः** - क्रोशं कुटिला गङ्गा। एकं क्रोशं पर्यन्तं निरन्तरं गङ्गा वक्ररेखायां प्रवहति इत्यर्थः। **क्रिया** - क्रोशम् अधीते। क्रोशं पर्यन्तं निरन्तरं पठति इत्यर्थः। **द्रव्यम्** - क्रोशं वनम्। क्रोशं यावत् निरन्तरं वनं विस्तृतम् इत्यर्थः।

**पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्** *(पा.सू. २.३.३२)*

**पदविभागः -** पृथग्विनानानाभिः (तृतीया-बहुवचनम्), तृतीया (प्रथमैकवचनम्), अन्यतरस्याम् (सप्तम्येकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च। अन्यतरस्यां ग्रहणं समुच्चयार्थम्, पञ्चमीद्वितीये चानुवर्तेते। पृथग् रामेण रामाद् रामं वा। एवं विना, नाना।

**उदाहरणानि -** पृथक् गुरुं वेदार्थज्ञानं नास्ति। गुरुं विहाय वेदार्थज्ञानं न सम्भवति इत्यर्थः। नाना हरिं, हरिणा, हरेः वा न मुक्तिः। हरिं विहाय मुक्तिः नास्ति इत्यर्थः। जलं, जलेन, जलाद् वा विना जीवनं नास्ति। जलं विहाय जीवनं न सम्भवति इत्यर्थः।

**अभ्यासप्रश्नाः**

1. कारकाणि कति भवन्ति ? तेषां नामानि लिखत।

2. प्रमुखकारकसूत्राणां व्याख्या सोदाहरणं कुरुत।

3. अकर्मकः धातवः कति भवन्ति ? तेषां नामानि लिखत।

4. रिक्तस्थानानि पूरयित्वा सोदाहरणं स्पष्टयत-

   I. उभसर्वतसोः......................दृश्यते।

   II. अभितः परितः..................योगेऽपि।

   III. पृथग्विना..........................स्याम्।

# चतुर्थः पाठः

# अच्सन्धिः

## (पररूप-पूर्वरूप-प्रगृह्यसन्धिश्च)

सम् उपसर्गपूर्वकात् डुधाञ् (धा) धातोः सन्धिशब्दः निष्पद्यते। यस्यार्थो भवति द्वयोः वर्णयोः परस्परं मेलनं सन्धिः कथ्यते। यदा सन्धिः भवति तदा तत्र आदेशः, आगमः, लोपः, प्रकृतिभावो वा भवति।

### पररूपसन्धिः

**एङि पररूपम्** *(पा.सू. ६.१.९४)* -

**पदविभागः -** एङि (सप्तम्येकवचनम्), पररूपम् (प्रथमैकवचनम्) इति। द्विपदमिदं सूत्रम्।

**वृत्तिः -** आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्।

**उदाहरणानि -** प्रेजते। उपोषति।

**अचोऽन्त्यादि टि** *(पा.सू. १.१.६४)*

**पदविभागः -** अचः (षष्ठ्येकवचनम्), अन्त्यादि (प्रथमैकवचनम्), टि (प्रथमैकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकन्ध्वादिषु पररूपं वाच्यम् *(वार्तिकम्)*। तच्च टेः *(वार्तिकम्)*। आकृतिगणोऽयम्।

**उदाहरणम् -** शक + अन्धुः = शकन्धुः। कर्क + अन्धुः = कर्कन्धुः। मनस् + ईषा = मनीषा। मार्त + अण्डः = मार्तण्डः। कुल + अटा = कुलटा।

### पूर्वरूपसन्धिः

**एङः पदान्तादति** *(पा.सू. ६.१.१०९)*

**पदविभागः -** एङः (पञ्चम्येकवचनम्), पदान्तात् (पञ्चम्येकवचनम्), अति (सप्तम्येक-वचनम्) इति। त्रिपदात्मकं सूत्रम्।

**वृत्तिः -** पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्।

**उदाहरणानि -** हरेऽव। विष्णोऽव।

**अन्यानि उदाहरणानि -** एते + अपि = एतेऽपि, सो + अहम् = सोऽहम्, देवदत्तो + अवदत् = देवदत्तोऽवदत्, अवसरो + अयम् = अवसरोऽयम्।

## प्रगृह्यसन्धिः

**ईदूदेद्द्विवचनं प्रगृह्यम्** *(१.१.११)*

**पदविभागः -** ईदूदेद्द्विवचनम् (प्रथमैकवचनम्), प्रगृह्यम् (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू।

**उदाहरणानि -** मुनी, साधू, गङ्गे, पचेते, वन्दावहे।

**प्लुतप्रगृह्या अचि नित्यम्** *(६.१.१२५)*

**पदविभागः -** प्लुतप्रगृह्याः (प्रथमाबहुवचनम्), अचि (सप्तम्येकवचनम्), नित्यम् (प्रथमैकवचनम्)। त्रिपदात्मकं सूत्रमिदम्।

**वृत्तिः -** एतेऽचि प्रकृत्याः स्युः। आगच्छ कृष्ण ३ अत्र गौश्चरति।

**उदाहरणम् -** प्लुतस्योदाहरणम् - आगच्छ कृष्ण ३ अत्र गौश्चरति।
प्रगृह्यस्योदाहरणम् - हरी एतौ, वन्दावहे आवाम्, पचेते ऋत्विजौ।

**अभ्यासप्रश्नाः**

1. एचोऽयवायावः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
2. कति उपसर्गाः भवन्ति ? के च ते ?
3. टि संज्ञा सूत्रं लिखित्वा सोदाहरणं स्पष्टयत।
4. केषां केषां प्रगृह्यसंज्ञा भवति ?

# पञ्चमः पाठः

## श्वेतकेतुः

महर्षिः श्वेतकेतुः आरुण्युद्दालकयोः पुत्रः आसीत्। सः गुरुकुले द्वादश वर्षाणि यावत् वेदशिक्षां सम्प्राप्य यदा गृहं प्रत्यागतः, तदा तस्य पिता तमपृच्छत् - हे श्वेतकेतो ! इदानीमपि त्वं वेदाभ्यासं कर्तुम् इच्छसि अथवा परिणयं करिष्यसि ? श्वेतकेतुः सगर्वम् अब्रवीत् - एकवारं राज्ञः जनकस्य सभां गत्वा तत्र शास्त्रार्थं कृत्वा विजयं प्राप्य आगमिष्यामि तत्पश्चात् भवान् यथोचितम् आज्ञापयतु। पुत्रस्य ईदृशम् अहङ्कारयुक्तं वचनं श्रुत्वा उद्दालकस्य मनसि चिन्ता समुद्भूता।

श्वेतकेतुः यदा पितुः समीपम् अगच्छत्, तदा पिता तम् अकथयत् - अहं चिन्तयामि यत् त्वं वेदानां सारं न ज्ञातवान् इति। किं त्वं तद् जानासि ? यस्य ज्ञानेन अज्ञातं सर्वं ज्ञातं भवति। तदा सः उक्तवान् - पितः! आचार्याः एतत् न अपाठयन्। श्वेतकेतोः प्रत्युत्तरं श्रुत्वा पिता उद्दालकः तं गृहात् बहिः आनीय काञ्चित् मृत्तिकां स्वीकृत्य अवदत् - यथा यदा त्वं मृत्तिकां जानासि तदा मृत्पात्राणां सर्वेषां ज्ञानं भवति यत् अत्र विद्यमानं द्रव्यमपि मृत्तिका इति, तथैव जडजगति विद्यमानेषु सर्वेषु वस्तुषु तन्मूलभूतं तत्त्वं विद्यते, यस्य ज्ञानेन सर्वो विषयो ज्ञातो भवति।

तदा श्वेतकेतुः अवदत् - अहं तद् न जानामि इति। उद्दालकः अब्रवीत् - अहम् एव सच्चिदानन्दस्वरूपं ब्रह्म इति, मत्तः एव संसारः समुद्भूतः। श्वेतकेतुः अपृच्छत् - भोः तात ! सत्स्वरूपात् चेतनस्वरूपात् च विविधतापूर्णस्य संसारस्य उत्पत्तिः कथं सम्भवति ? उद्दालकः वटस्य लघूनि बीजानि दर्शयित्वा अवदत् - यथा चेतनतत्त्वात् विशालः वटवृक्षः अभवत्, तथैव एकस्मिन् कलशे लवणं जलं च मेलयित्वा श्वेतुकेतुं प्रति उक्तवान् - कलशस्य सर्वभागात् जलं पिब। तथा चोक्तम् - **लवणमेतदुदकेऽवधायाथ मा प्रातरूपसीदथा.....** *(छा.उप. ६.१)*। कलशस्य जलं सर्वत्र लवणमयम् आसीत्। पुनः उद्दालकः अवदत् - यथा अदृश्यमानेऽपि लवणे जलस्य सर्वभागेषु लवणं विद्यते, तथैव अदृश्यमानेऽपि तच्चैतन्ये तत् त्वयि मयि सर्वत्र च विद्यते। इत्थं विविधानि उदाहरणानि प्रदर्श्य नववारं 'तत्त्वमसि' **स आत्मा तत्त्वमसि** - *(छा.उप. ६.६)* इति महावाक्यम् उद्घोषितवान्। श्वेतकेतुः तस्यार्थम् आत्मसात् न अकरोत्।

**अभ्यासप्रश्नाः**

5. श्वेतकेतुः कयोः पुत्रः आसीत् ?
6. उद्दालकः आरुणिं प्रति चिन्तायाः किं कारणम् अवदत् ?
7. उद्दालकः श्वेतकेतुं किमपृच्छत् ?
8. उद्दालकः तत्त्वमसि इति महावाक्यं कति वारं उद्घोषितवान् ?

# षष्ठः पाठः

# सुभाषितानि

विना वेदं विना गीतां, विना रामायणीं कथाम्।
विना कविं कालिदासं, भारतं भारतं न हि॥ १॥
रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम्।
शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति ॥ २ ॥
अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥ ३ ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यासनं चैव वाङ्मयं तपः उच्यते॥ ४ ॥
अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।
भोजने चामृतं वारि भोजनान्ते विषापहम्॥ ५ ॥
अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्॥ ६ ॥
येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः।
ते मृत्युलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति॥ ७ ॥
साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणन्न खादन्नपि जीवमानस्तद् भागधेयं परमं पशूनाम्॥ ८ ॥
यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः सः श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति॥ ९ ॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्!॥ १० ॥

### अभ्यासप्रश्ना:

1. यस्य वित्तमस्ति सः नरः कथं भवति ?
2. शयने रामादीनां स्मरणेन कः नश्यति ?

3. अधोलिखितान् श्लोकान् पूरयित्वा संस्कृतगिरा भावार्थः लिखत-

I. विना वेदं.............................भारतं न हीं।

II. अपूर्वः कोऽपि.....................सञ्चयात्।

III. अजरामरवत्.....................धर्ममाचरेत्।

IV. येषां न विद्या.....................मृगाश्चरन्ति।

# सप्तमः पाठः

# कारकम्

## करणकारकम्, सम्प्रदानकरकम्, उपपदविभक्तिश्च

### करणकारकम्

**साधकतमं करणम्** *(पा.सू. १.४.४२)*

**पदविभागः -** साधकतमम् (प्रथमैकवचनम्), करणम् (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। तमब्ग्रहणं किम् ? गङ्गायां घोषः।

**उदाहरणम् -** वृद्धः दण्डेन चलति। अत्रः कर्तुः वृद्धस्य चलनक्रियायां दण्डः अतिशयेन सहायकम् अस्ति अतः दण्डः इति करणकारकं भवति।

**कर्तृकरणयोस्तृतीया** *(पा.सू. 2.३.१८)*

**पदविभागः -** कर्तृकरणयोः (सप्तमीद्विवचनम्), तृतीया (प्रथमैकवचनम्)

**वृत्तिः -** अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली।

प्रकृत्यादिभ्य उपसंख्यानम् (वार्तिकम्)। प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन वा यातीत्यादि।

**उदाहरणानि -** **अनभिहिते कर्तरि तृतीया -**

१. ब्रह्मचारिभिः सन्ध्याचरणं क्रियते।

२. मया पुस्तकं पठ्यते।

**सहयुक्तेऽप्रधाने** *(पा.सू. २.३.१९)*

**पदविभागः -** सहयुक्ते (सप्तम्येकवचनम्), अप्रधाने (सप्तम्यैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सह आगतः पिता। सह, साकं, सार्धं, समं इति पदानां योगे तृतीया विभक्तिः भवति। विना तद्योगं तृतीया। पुत्रेण आगतः पिता।

**उदाहरणम् -** १. सीतया सह रामः वनम् अगच्छत्।

२. पुत्रः पित्रा सार्धं वेदपाठशालां याति।

३. अर्जुनः भगिन्या साकं क्रीडति।

४. शिशुः मात्रा समम् अस्ति।

**येनाङ्गविकारः** *(पा.सू. २.३.२०)*

**पदविभागः** - येन (तृतीयैकवचनम्), अङ्गविकारः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** - येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात्। अक्ष्णा काणः।

**उदाहरणानि** - १. वृद्धः <u>अक्ष्णा</u> काणः अस्ति। २. दुर्जनः <u>पादेन</u> खञ्जः।

**इत्थंभूतलक्षणे** *(पा.सू. २.३.२१)*

**पदविभागः** - इत्थंभूतलक्षणे (सप्तम्येकवचनम्)। एकपदात्मकं सूत्रमिदम्।

**वृत्तिः** - कञ्चितप्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः।
जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।

**उदाहरणानि** - १. सः शिखया वेदाध्यायी प्रतीयते।

**हेतौ** *(पा.सू. २.३.२३)*

**पदविभागः** - हेतौ (सप्तम्येकवचनम्)। एकपदात्मकं सूत्रमिदम्।

**वृत्तिः** - हेत्वर्थे तृतीया स्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति।

**वृत्तिः** - क्रियासिद्धौ यः कारणभूतः अस्ति तस्मिन् तृतीया विभक्तिः भवति।

**उदाहरणानि** - १. दण्डेन घटः।
२. पुण्येन दृष्टो हरिः।

'विना' इति पदस्य योगे तृतीया विभक्तिः भवति। यथा- सूर्येण विना प्रकाशः न भवति।

'अलम्' इति पदस्य योगे निषेधार्थे तृतीया विभक्ति भवति। यथा - अलं रोदनेन।

## सम्प्रदानकारकम्

**कर्मणा यमभिप्रैति स सम्प्रदानाम्** *(पा.सू. १.४.३२)*

**पदविभागः** - कर्मणा (तृतीयैकवचनम्), यम् (द्वितीयैकवचनम्), अभिप्रैति (क्रियापदम्), सः (प्रथमैकवचनम्), सम्प्रदानम् (प्रथमैकवचनम्)। पञ्चपदमिदं सूत्रम्।

**वृत्तिः** - दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।

**चतुर्थी सम्प्रदाने** *(पा.सू. २.३.१३)*

**पदविभागः** - चतुर्थी (प्रथमैकवचनम्), सम्प्रदाने (सप्तम्येकवचनम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः -** विप्राय गां ददाति। अनभिहिते इत्येव। दीयतेऽस्मै दानीयो विप्रः। 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' (वार्तिकम्)। पत्ये शेते। 'यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा' (वार्तिकम्)। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः।

**उदाहरणानि -** १. नृपः विप्राय गां ददाति। अत्र नृपः दानरूपकर्मणा विप्रम् अभिसम्बद्धुम् इच्छति। अत्र विप्र इति सम्प्रदानसंज्ञकं भवति। सम्प्रदानसंज्ञकात् विप्र इति पदे चतुर्थीविभक्तिः भवति।

**रुच्यर्थानां प्रीयमाणः** *(पा.सू. १.४.३३)*

**पदविभागः -** रुच्यर्थानाम् (षष्ठीबहुवचनम्), प्रीयमाणः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। हरये रोचते भक्तिः। प्रीयमाणः किम्? देवदत्ताय रोचते मोदकः पथि।

**उदाहरणानि -** १. शिशवे क्षीरं रोचते। २. बालिकायै पाटलपुष्पाणि रोचन्ते।

**स्पृहेरीप्सितः** *(पा.सू. १.४.३६)*

**पदविभागः -** स्पृहेः (षष्ठ्येकवचनम्), ईप्सितः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किम् ? पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रेयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा। पुष्पाणि स्पृहयति।

**उदाहरणानि -** १. बालिका पुष्पेभ्यः स्पृहयति। २. देवः फलेभ्यः स्पृहयति। ३. वयं वेदेभ्यः स्पृहयेम। ४. गुरुः शिष्येभ्यः स्पृहयेत्। ५. त्वं दूरवाण्यै मा स्पृहय।

## उपपदविभक्तिः

**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च** *(पा.सू. २.३.१६)*

**पदविभागः -** नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगात् (पञ्चम्येकवचनम्), च (अव्ययम्)।

**वृत्तिः -** एभिर्योगे चतुर्थी स्यात्। हरये नमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी (परिभाषा)। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणम् (वार्तिकम्)। तेन दैत्येभ्यो हरिरलं।

**उदाहरणानि -** **नमः योगे** - वेदपुरुषाय नमः, वेदमूर्त्तये नमः, हरये नमः।

**स्वस्ति योगे** - प्रजाभ्यः स्वस्ति। **स्वाहा** - अग्नये स्वाहा। **स्वधा** - पितृभ्यः स्वधा।

**अलं योगे** - असुरेभ्यः हरिः अलम्। **वषड्** - इन्द्राय वषड्।

**तादर्थ्ये चतुर्थी वाच्या** *(वार्तिकम्)* -

**पदविभागः** - तादर्थ्ये (सप्तम्येकवचनम्), चतुर्थी (प्रथमैकवचनम्), वाच्या (प्रथमैकवचनम्)।

**वार्तिकार्थः** - तस्मै इदं तदर्थम्, तदर्थस्य भावः तादर्थ्यम्। तस्मिन् चतुर्थीविभक्तिः स्यात्।

**उदाहरणानि** - १. प्रह्लादः मुक्तये हरिं भजति। २. शिशुः क्षीराय रोदिति।

**क्लृपि सम्पद्यमाने च** *(वार्तिकम्)*

**वार्तिकार्थः** - क्लृप्यर्थकधातूनां प्रयोगे यः सम्पद्यते तत्र चतुर्थीविभक्तिः भवति।

**उदाहरणानि** - १. विद्या मुक्तये कल्पते। २. श्रद्धा ज्ञानाय भवति। ३. भक्तिः ज्ञानाय जायते।

**तुमर्थाच्च भाववचनात्** *(२.३.१५)*

**पदविभागः** - तुमर्थात् (पञ्चम्येकवचनम्), च (अव्ययम्), भाववचनात् (पञ्चम्येकवचनम्)।

**वृत्तिः** - भाववचनाश्च इति सूत्रेण यो विहितः तदन्तात् चतुर्थी स्यात्।

**उदाहरणम्** - यागाय याति। यष्टुं यातीत्यर्थः। दानाय (दातुं) धनम् अर्जयति।

**क्रियार्थोपपदस्य च कर्मणि स्थानिनः** *(२.३.१४)*

**पदविभागः** -क्रिया-अर्थ-उपपदस्य (षष्ठ्येकवचनम्), च (अव्ययम्), कर्मणि (सप्तम्येकवचनम्), स्थानिनः (षष्ठ्येकवचनम्)। चतुष्पदं सूत्रमिदम्।

**वृत्तिः** - क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्।

**उदाहरणम्** - फलेभ्यो याति। फलानि आहर्तुं यातीत्यर्थः। वनाय (गन्तुं) गां मुमोच। गणपतये (प्रीणयितुं) नमस्करोति।

**अभ्यासप्रश्नाः**

1. सहयुक्तेऽप्रधाने इति सूत्रस्य त्रीणि उदाहरणानि लिखत।
2. करणकारके का विभक्तिः भवति ससूत्रं स्पष्टयत ?
3. सम्प्रदानसंज्ञा सूत्रं सोदाहरणं विवेचयत।
4. अलम्, विना, नमः, सकम् इत्येतेषां पदानां योगे का विभक्तिः भवति ?
5. निम्नलिखितानां सूत्राणां सोदाहरणं वृत्तिं लिखत-

    I. येनाङ्गविकारः

    II. इत्थंभूतलक्षणे

    III. रुच्यर्थानां प्रीयमाणः

# अष्टमः पाठः

## हल्सन्धिः

हल्वर्णैः हल्वर्णानां सम्मेलनेन जायमानः सन्धिः हल्सन्धिरुच्यते। हल्भिः सह अचां हलां च मेलनेन यः विकारः उत्पद्यते सः हल्-सन्धिः उच्यते।

### श्चुत्वसन्धिः

**स्तोः श्चुना श्चुः** *(८.४.४०)*

**पदविभागः -** स्तोः (षष्ठ्येकवचनम्), श्चुना (तृतीयैवचनम्), श्चुः (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। रामश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जय।

| स्थानी | स् | त् | थ् | द् | ध् | न् |
|---|---|---|---|---|---|---|
| आदेशः | श् | च् | छ् | ज् | झ् | ञ् |

**उदाहरणानि -** (क) रामस् + शेते = रामश्शेते (ख) सत् + चरित्रम् = सच्चरित्रम्
(ग) उद् + ज्वलम् = उज्ज्वलम् (घ) तपस् + चर्या = तपश्चर्या

### ष्टुत्वसन्धिः

**ष्टुना ष्टुः** *(८.४.४१)*

**पदविभागः -** ष्टुना (तृतीयैकवचनम्), ष्टुः (प्रथमैकवचनम्)।

**वृत्तिः -** स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे।

| स्थानी | स् | त् | थ् | द् | ध् | न् |
|---|---|---|---|---|---|---|
| आदेशः | ष् | ट् | ठ् | ड् | ढ् | ण् |

**उदाहरणानि -** (क) बालस् + षष्ठः = बालष्षष्ठः (ख) बृहत् + टीका = बृहट्टीका
(ग) आकृष् + तः = आकृष्टः (घ) षण् + नगर्यः = षण्णगर्यः
(ङ) उद् + डयनम् = उड्डयनम् (च) चक्रिन् + ढौकसे = चक्रिण्ढौकसे

### जश्त्वसन्धिः

**झलां जशोऽन्ते** *(पा.सू. ८.२.३९)*

**पदविभागः -** झलाम् (षष्ठीबहुवचनम्), जशः (प्रथमाबहुवचनम्), अन्ते (सप्तम्येकवचनम्) इति। त्रिपदात्मकं सूत्रम्।

**वृत्तिः -** पदान्ते झलां जशः स्युः। वागीशः।

**उदाहरणम् -** सुप् +अन्तः = सुबन्तः(प् = ब्), जगत् + ईशः = जगदीशः(त् = द्)।

## अनुनासिकसन्धिः

**यरोऽनुनासिकेऽनुनासिको वा** *(पा.सू. ८.४.४५)*

**पदविभागः -** यरः (षष्ठ्येकवचनम्), अनुनासिके (सप्तम्येकवचनम्), अनुनासिकः (प्रथमैकवचनम्), वा (अव्ययम्) इति। चतुष्पदात्मकं सूत्रम्।

**वृत्तिः -** यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः, एतद् मुरारिः। 'प्रत्यये भाषायां नित्यम्' (वार्तिकम्)। तन्मात्रम्। चिन्मयम्।

**उदाहरणानि -** एतन्मुरारिः = एतद् + मुरारिः = एतन् मुरारिः(द् = न्) = एतन्मुरारिः/एतद् मुरारिः।

वाक् + मुखम् = वाङ्मुखम् (क् = ङ्) / वाग् मुखम्

षड् + मासाः = षण्मासाः(ड् = ण्) / षड् मासाः

भगवत् + नाम = भगवन्नाम(त् = न्) / भगवद् नाम

**प्रत्यये भाषायां नित्यम्** *(वार्तिकम्)* -

पदान्तस्य यरः अनुनासिकादिप्रत्यये परे नित्यम् अनुनासिकः आदेशः भवति।

**उदाहरणानि -** वाक् + मयम् = वाङ्मयम्, चिद् + मयम् = चिन्मयम्,

तद् + मात्रम् = तन्मात्रम्, अप् + मयम् = अम्मयम्।

## चर्त्वसन्धिः

**खरि च** *(पा.सू. ८.४.५५)*

**पदविभागः -** खरि (सप्तम्येकवचनम्), च (अव्ययम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः -** खरि झलां चरः स्युः। इत्युदो दस्य तः। उत्थानम्। उत्तम्भनम्। शकार-षकार-सकाराणां चर्त्वे कृते तत्स्थाने स एव वर्णः विधीयते।

| स्थानी | आदेशः | निमित्तम् | उदाहरणम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| **क, ख, ग, घ** | क | खरि परे | दिक्पालः |
| **च, छ, ज, झ** | च | खरि परे | तच्छिवः |
| **ट, ठ, ड, ढ** | ट | खरि परे | षड्गु |
| **त, थ, द, ध** | त | खरि परे | रुणत्सि |
| **प, फ, ब, भ** | प | खरि परे | लप्स्यते |

**उदाहरणानि -**

(क) सद् + कारः = सत्कारः (द् = त्)

(ख) वाग् + पटुः = वाक्पटुः (ग् = क्)

(ग) तज् + श्लोकः = तच्छ्लोकः (ज् = च्)

(घ) विराड् + पुरुषः = विराट् पुरुषः (ड् = ट्)

(ङ) आरभ् + स्यते = आरप्स्यते (भ् = प्)

## छत्वसन्धिः

**शश्छोऽटि** *(पा.सू. ८.४.६३)*

**पदविभागः -** शः(षष्ठ्येकवचनम्), छः(प्रथमैकवचनम्), अटि (सप्तम्येकवचनम्)।

**वृत्तिः -** झयः परस्य शस्य छो वाऽटि। तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः। तच्छिवः, तच्शिवः। छत्वममीति वाच्यम् (वार्तिकम्)। तच्छ्लोकेन।

| स्थानी | आदेशः | निमित्तम् |
|---|---|---|
| श् | छ् | अटि परे |

**उदाहरणानि -**

१. तद् + शिवः = तज् + शिवः = तच् + शिवः = तच्छिवः/तच्शिवः (श् = छ)

२. बृहद् + शक्तिः = बृहज् + शक्तिः = बृहच् + शक्तिः = बृहच्छक्तिः/बृहच्शक्तिः।

३. तत् + शास्त्रम् = तद् + शास्त्रम् = तज् + शास्त्रम् = तच्छास्त्रम्/तच्शास्त्रम्।

## अनुस्वारसन्धिः

**मोऽनुस्वारः** *(८.३.२३)*

**पदविभागः -** मः (षष्ठ्येकवचनम्), अनुस्वारः (प्रथमैकवचनम्) इति। द्विपदं सूत्रम्।

**वृत्तिः -** मान्तस्य पदस्याऽनुस्वारः स्याद्धलि। हरिं वन्दे। पदस्येति किम् ? गम्यते।

**उदाहरणानि -** हरिम् + वन्दे = हरिं वन्दे (म् = अं)

अहम् + वदामि = अहं वदामि

**नश्चापदान्तस्य झलि** *(८.३.२४)*

**पदविभागः -** नः (षष्ठ्येकवचनम्), च (अव्ययम्), अपदान्तस्य (षष्ठ्येकवचनम्), झलि (सप्तम्येकवचनम्) इति। चतुष्पदं सूत्रम्।

**वृत्तिः -** नस्य मस्य च पदान्तस्य झल्यनुस्वारः स्यात्। यशांसि। आक्रंस्यते। झलि किम् ? मन्यते।

**उदाहरणानि -** यशान् + सि = यशांसि (न् = अं), (म् = न्),

आक्रम् + स्यते = आक्रंस्यते (म् = अं), सरान् + सि = सरांसि(न् = अं),

सङ्कम् + स्यते = सङ्कंस्यते (म् + अं)

## परसवर्णसन्धिः

**अनुस्वारस्य ययि परसवर्णः** *(८.४.५८)*

**पदविभागः -** अनुस्वारस्य (षष्ठ्येकवचनम्), ययि (सप्तम्येकवचनम्), परसवर्णः (प्रथमैकवचनम्) इति। त्रिपदात्मकं सूत्रम्।

**वृत्तिः -** अनुस्वारस्य ययि परसवर्णः स्यात्। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गुम्फितः।

**उदाहरणानि -** अन् + कितः = अं + कितः = अङ्कितः (न् + अं = ङ्)

सिन् + चति = सिं + चति = सिञ्चति (न् = अं = ञ्)

लुन् + ठनम् = लुं + ठनम् = लुण्ठनम् (न् = अं = ण्)

शाम् + तिः = शां + तिः = शान्तिः (म् = अं = न्)

कम् + पते = कं + पते = कम्पते (म् = अं = म्)

## ङमुडागमसन्धिः

**ङमो ह्रस्वादचि ङमुण् नित्यम्** *(पा.सू. ८.४.५५)*

**पदविभागः -** ङमः (पञ्चम्येकवचनम्), ह्रस्वाद् (पञ्चम्येकवचनम्), अचि (सप्तम्येकवचनम्), ङमुट् (प्रथमैकवचनम्), नित्यम् (द्वितीयैकवचनम्)। पञ्चपदं सूत्रमिदम्।

**वृत्तिः -** ह्रस्वात्परो यो ङम्, तदन्तं यत्पदं तस्मात्परस्याचो ङमुट्। प्रत्यङ्ङात्मा। सुगण्णीशः।

**उदाहरणानि -** १. प्रत्यङ् + आत्मा = प्रत्य + ङ् + ङ् + आत्मा = प्रत्यङ्ङात्मा

२. सुगण् + ईशः = सुग् + ण् + ण् + ईशः = सुगण्णीशः

**नश्छव्यप्रशान्** *(पा.सू. ८.३.७)*

**पदविभागः -** नः (षष्ठ्येकवचनम्), छवि (सप्तम्येकवचनम्), अप्रशान् (प्रथमैकवचनम्)।

**वृत्तिः -** अम्परे छवि नकारान्तस्य पदस्य रुः स्यान्न तु प्रशान्शब्दस्य।

**अत्रानुनासिकः पूर्वस्य तु वा** *(पा.सू ८.३.२)*

**पदविभागः -** अत्र (अव्ययम्), अनुनासिकः (प्रथमैकवचनम्), पूर्वस्य (षष्ठ्येकवचनम्), तु (अव्ययम्), वा (अव्ययम्)। पञ्चपदमिदं सूत्रम्।

**वृत्तिः -** अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा।

**अनुनासिकात् परोऽनुस्वारः** *(पा.सू ८.३.४)*

**पदविभागः -** अनुनासिकात् (पञ्चम्येकवचनम्), परः (प्रथमैकवचनम्), अनुस्वारः (प्रथमैकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः।

**खरवसानयोर्विसर्जनीयः** *(पा.सू ८.३.१५)*

**पदविभागः -** खरवसानयोः (सप्तमीद्विवचनम्), विसर्जनीयः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** खरि अवसाने च पदान्तस्य रेफस्य विसर्गः। संपुंकानां सो वक्तव्यः (वार्तिकम्)। सँस्स्कर्ता। संस्स्कर्ता।

**उदाहरणानि -** १. भवान् + चिनोतु = भवाँश्चिनोतु/भवांश्चिनोतु

२. दुर्जनान् + त्यजेत् = दुर्जनाँस्त्यजेत्/दुर्जनांस्त्यजेत्

**अभ्यासप्रश्नाः**

1. हल्-सन्धिः किमुच्यते ?
2. चर्त्वसन्धेः सूत्रं लिखित्वा सोदाहरणं स्पष्टयत।
3. मोऽनुस्वारः इति सूत्रेण मकारस्य स्थाने अनुस्वारः कदा भवति ?
4. अधोलिखितानां सूत्राणां सोदाहरणं व्याख्या कार्या-
   I. स्तोः श्चुना श्चुः
   II. ष्टुना ष्टुः
   III. झलां जशोऽन्ते
   IV. यरोऽनुनासिकोऽनुनासिको वा

# नवमः पाठः

# पुत्रीं रक्ष, पुत्रीं पाठय

(ग्रीष्मावकाशे पितृगृहं प्राप्तवत्याः लतायाः सर्वे स्वागतं कुर्वन्ति। तत्र लतायाः भ्रातृजाया खिन्ना प्रतिभाति।)

लता - भ्रातृजाये ! चिन्तिता असि वा ? सर्वं कुशलं खलु ?

दीक्षा - आम्। लते ! कुशलिनी अहम्।

(रात्रौ भोजनसमये लता दीक्षां अवलोकयति, तस्याः मनोदशा सम्यक् न प्रतिभाति स्म, अतः सा तूष्णीमेव अतिष्ठत्।)

दिनेशः - भगिनि ! दिष्ट्या त्वं समागता। मम कार्यालये एका महत्त्वपूर्णा संगोष्ठी सहसैव सम्पादनीया वर्तते। अद्यैव त्वं दीक्षां वैद्यालयं नयेः, तत्र दीक्षायाः चिकित्सिकया सह मेलनस्य समयः निर्धारितः अस्ति, तस्याः परामर्शानुसारं यद् विधेयं तत् सम्पादय।

(दीक्षा लता च चिकित्सिकां प्रति गच्छन्त्यौ वार्तां कुरुतः)

लता - भ्रातृजाये ? किमभवत् ? का समस्याऽस्ति ?

दीक्षा - लते ! अहं मासत्रयस्य गर्भं स्वकुक्षौ धारयामि। तव भ्रातुः आग्रहः अस्ति यत् अहं लिङ्गपरीक्षणं कारयेयम्। कुक्षौ कन्या अस्ति चेत् गर्भं पातयेयम्।

लता - अहो ! भ्राता एवं चिन्तयितुम् अपि कथं प्रभवति ? शिशुः कन्याऽस्ति चेत् वधार्हा ? अधुना एव गृहं चल, नास्ति आवश्यकता भ्रूणपरीक्षणस्य। भ्रात्रा सह अहं सम्भाषिष्ये।

(सन्ध्यायां चायपानार्थं सर्वेऽपि सम्मिलिता भवन्ति।)

दिनेशः - दीक्षे ! त्वं चिकित्सिकां प्रति गतवती आसीः ? किम् अकथयत् सा ?

लताः - भोः भ्रातः ! त्वं किं ज्ञातुमिच्छसि ? तस्याः कुक्षौ पुत्री अस्ति वा पुत्रः ? किमर्थम् ? षण्मासानन्तरं सर्वं स्पष्टं भविष्यति, समयात् पूर्वं किमर्थम् एतादृशः आयासः ?

दिनेशः - भगिनि ! त्वं तु जानास्येव, अस्माकं गृहे पुष्पा पुत्रीरूपेण अस्त्येव अधुना एकस्य पुत्रस्य आवश्यकता अस्ति तर्हि .....

लता - तर्हि कुक्षौ पुत्री अस्ति चेत् हन्तव्या ? (उच्चैः) भ्रूणहत्यायाः पापं कर्तुं प्रवृत्तोऽसि त्वम्।

दिनेशः - हननं तु न .........

लता - तर्हि घृणितं कृत्यमिदं किमस्ति ? अस्माकं जनक इमां पंक्तिं वदति स्म -

**"आत्मा वै जायते पुत्रः पुत्रेण दुहिता समा"**

तव मनसि एतादृशः कुत्सितः विचारः आगतः, इदं चिन्तयित्वैव अहं खिन्नास्मि। तव शिक्षा वृथा।

दिनेशः - भगिनि ! विरम विरम अहं ममापराधं ज्ञातवान् लज्जितश्च अस्मि। यथा पुष्पा मम सम्पूर्णस्नेहस्य अधिकारिणी अस्ति, तथैव आगन्ता शिशुः अपि स्नेहाधिकारी भविष्यति पुत्रः भवतु पुत्री वा। अहं स्वगर्हितं चिन्तनं प्रति अनुतापं करोमि, श्लोकोऽयं विस्मृतो मया।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैताः न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥**

दिनेशः - लते ! त्वं मां सन्मार्गं अदर्शयः। वयसा कनिष्ठाऽपि त्वं मम गुरुरसि।

लता - अलं पश्चात्तापेन। भ्रातृजाये ! आगच्छ सर्वाः चिन्ताः त्यज, आगन्तुः शिशोः स्वागताय च सन्नद्धो भव। भ्रातः त्वं संकल्पं कुरु - कन्यायाः रक्षणे पालने पोषणे च दत्तचित्तो भविष्यामि इति। **"पुत्रीं रक्ष पुत्रीं पाठय"** इति सर्वकारस्य इमाम् उद्घोषणां वयं सम्भूय सार्थकीं करिष्यामः।

**अभ्यासप्रश्नाः**

1. अवकाशे पितृगृहं प्राप्ता लतायाः भ्रातृजाया कथं प्रतिभाति ?
2. अस्मात् पाठात् सुष्मदस्मच्छब्दयोः रूपाणि चित्वा पृथक्-पृथक् लिखत।
3. दिनेशः किं जघन्यं कृत्यं कर्तुमिच्छति ?
4. अधोलिखिनां श्लोकानां भावार्थः संस्कृतभाषया लिखत-

   I. यत्र नार्यस्तु..........................क्रियाः।

   II. नास्ति मातृसमा....................प्रिया।

# दशमः पाठः

# कारकम्

## अपादानकारकम्, अधिकरणकारकम्, उपपदविभक्तिश्च

### अपादानकारकम्

**ध्रुवमपायेऽपादानम्** *(पा.सू. १.४.२४)*

**पदविभागः -** ध्रुवम् (प्रथमैकवचनम्), अपाये (सप्तम्येकवचनम्), अपादानम् (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** अपायो विश्लेषः, तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्।

**उदाहरणानि -** (१) वृक्षेभ्यः पत्राणि पतन्ति। अत्र वृक्षः ध्रुवः(स्थिरः), तस्मात् पत्राणि पृथग्भवन्ति, अत्र विभागस्य आश्रयभूतानि भवन्ति पत्राणि।

**अपादाने पञ्चमी** *(पा.सू. २.३.२८)*

**पदविभागः -** अपादाने (सप्तम्येकवचनम्), पञ्चमी (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** अनुक्तेऽपादाने कारके पञ्चमी स्यात्। ग्रामादायाति। धावतोऽश्वात्पतति। कारकं किम् ? वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम् (वार्तिकम्)। पापाज्जुगुप्सते, विरमति। धर्मात् प्रमाद्यति।

**उदाहरणानि -** (१) राकेशः ग्रामाद् आयाति। (२) तस्मात् लेखनीं स्वीकुरु।

**भीत्रार्थानां भयहेतुः** *(पा.सू. १.४.२५)*

**पदविभागः -** भीत्रार्थानाम् (षष्ठीबहुवचनम्), भयहेतुः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** भयार्थानां त्राणार्थानाञ्च प्रयोगे हेतुरपादानं स्यात्। चोराद्बिभेति। चोरात्त्रायते। भयहेतुः किम् ? अरण्य बिभेति त्रायते वा।

**उदाहरणानि -** (१) शिशुः बिडालाद् बिभेति। (२) बालिका तैलपाद् बिभेति।

**जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्** *(वार्तिकम्)* - जुगुप्साद्यर्थकधातुभिर्योगे जुगुप्सादि-विषयस्य अपादानं स्यात्। उदाहरणम् - पापाद् जुगुप्सते, पापाद् विरमति, धर्मात् प्रमाद्यति।

**आख्यातोपयोगे** *(पा.सू. १.४.२९)*

**पदविभागः -** आख्याता (प्रथमैकवचनान्तम्), उपयोगे (सप्तम्येकवचनान्तम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** नियमपूर्वकविद्यास्वीकारे वक्ता अपादानसंज्ञः स्यात्। उपाध्यायादधीते। उपयोगे किम् ? नटस्य गाथां शृणोति।

**उदाहरणानि -** (क) गुरोः वेदम् अधीते। (ख) पुत्रः पितुः व्याकरणं पठति।

**पराजेरसोढः** *(पा.सू. १.४.२६)*

**पदविभागः -** पराजेः (षष्ठ्येकवचनम्), असोढः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। असोढः किम् ? शत्रून् पराजयते। अभिभवतीत्यर्थः।

**उदाहरणानि -** (क) बालकः अध्ययनात् पराजयते। (ख) हिडिम्बः भीमात् पराजयत।

**भुवः प्रभवः** *(पा.सू. १.४.३१)*

**पदविभागः -** भुवः (षष्ठ्येकवचनम्), प्रभवः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** भवतेः कर्तुः प्रभवः, तत्कारकमपादानसंज्ञं स्यात्। भवनं भूः। भूकर्तुः प्रभवस्तथा, हिमवतो गङ्गा प्रभवति। तत्र प्रकाशते इत्यर्थः।

**उदाहरणानि -** (क) हिमालयात् गङ्गा प्रभवति। अत्र हिमालयः गङ्गायाः उत्पत्तिस्थानं वर्तते, अतः हिमालयात् इत्यत्र अपादानमभवत्। (ख) अमरकण्टकात् नर्मदा प्रभवति।

**जनिकर्तुः प्रकृतिः** *(पा.सू. १.४.३१)*

**पदविभागः -** जनिकर्तुः (षष्ठ्येकवचनम्), प्रकृतिः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते।

**उदाहरणानि -** ब्रह्मणः प्रजाः प्रजायन्ते। अत्र प्रजानां जननस्य कारणं/हेतुः भवति ब्रह्मा, अतः प्रकृतसूत्रेण अत्र ब्रह्मणः इत्यत्र अपादानकारकं जातम्।

**वारणार्थानामीप्सितः** *(पा.सू. १.४.२७)*

**पदविभागः -** वारणार्थानाम् (षष्ठीबहुवचनम्), ईप्सितः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** प्रवृत्तिविघातो वारणम्, वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। ईप्सितः किम् ? यवेभ्यो गां वारयति क्षेत्रे।

**उदाहरणानि -** यवेभ्यो गां वारयति। यवेभ्यो गां निवर्तयतीत्यर्थः। गुरुः शिष्यं पापाद् वारयति।

## उपपदविभक्तिः

**अन्यारादितरर्त्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते** *(पा.सू. २.३. २९)*

**पदविभागः -** अन्याराादितरर्त्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते (सप्तम्येकवचनान्तम्)। एकपदमिदं सूत्रम्।

**वृत्तिः** -एतैर्योगे पञ्चमी स्यात्। अन्येत्यर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात् पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात्पूर्वः फाल्गुनः।

**उदाहरणानि -** (क) कृष्णात् अन्यः बलरामः। (ख) तस्य गृहम् आराद् वनाद्

## अधिकरणकारकम्

**आधारोऽधिकरणम्** *(पा.सू. १.४.४५)*

**पदविभागः -** आधारः (प्रथमैकवचनम्), अधिकरणम् (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात्।

**सप्तम्यधिकरणे च** *(पा.सू. २.३.३६)*

**पदविभागः -** सप्तमी (प्रथमैकवचनम्), अधिकरणे (सप्तम्येकवचनम्), च (अव्ययम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अधिकरणे सप्तमी स्यात्। चकारात् दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अन्तिके वा। दूरान्तिकार्थेभ्यः (सू.) इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। विग्रहे इष्टादिभ्यश्च (सू.) इति कर्तरीनिः।

**औपश्लेषिकः -** कटे आस्ते, अर्जुनः रथे उपविशति, माता स्थाल्यां पचति, अरण्ये व्याघ्रः भ्रमति, पाठशालायाम् उपाध्यायः पाठयति। अत्र संयोगसम्बन्धः। अतः अयम् औपश्लेषिकः आधारः।

**वैषयिकः -** मोक्षे इच्छास्ति, वेदाध्ययने रुचिः वर्तते, बालिकायाः गीते आसक्तिः अस्ति, गुरौ श्रद्धा अस्ति। अत्र विषयसम्बन्धः संयोगः। अतोऽयम् वैषयिक आधारः।

**अभिव्यापकः -** संयोगसमवायमूलकः सकलावयवव्याप्तिरूप आधारोऽभिव्यापकः। यथा - सर्वस्मिन् आत्मा अस्ति। तिलेषु तैलम् अस्ति, दध्नि घृतम्, गीतायां ज्ञानमस्ति। सर्वत्राभिव्याप्तम् इत्यर्थः।

**निमित्तात् कर्मयोगे** *(वार्तिकम्)* - कर्मयोगे हेतुवाचकाच्छब्दात् सप्तमी वाच्या इत्यर्थः। **उदाहरणानि -**

**चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।**
**केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥**

**क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्** *(वार्तिकम्)* -

इन्परकक्तप्रत्ययान्तस्य कर्मणः सप्तमीविभक्तिः स्यात्।

**उदाहरणानि** - अधीती व्याकरणे। अधीती चतुर्षु आम्नायेषु।

**साध्वसाधुप्रयोगे च** *(वार्तिकम्)* - साधुः कृष्णो मातरि। असाधुर्मातुले।

**षष्ठी चानादरे** *(२.३.३८)*

**पदविभागः** - षष्ठी (प्रथमैकवचनम्), च (अव्ययम्), अनादरे (सप्तम्येकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः** - अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः।

**उदाहरणम्** - रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः।

**यस्य च भावेन भावलक्षणम्** *(पा.सू. २.३.३७)*

**पदविभागः** - यस्य (षष्ठ्येकवचनम्), च (अव्ययम्), भावेन (तृतीयैकवचनम्), भावलक्षणम् (प्रथमैकवचनम्)।

**वृत्तिः** - यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। यत्र एकक्रियायाः अनन्तरम् अपरा क्रिया भवति तदा पूर्वक्रियायाः कर्तरि सप्तमीविभक्तिः भवति।

**उदाहरणानि** - (क) गोषु दुह्यमानासु गतः। गोदोहनकाले गतः इत्यर्थः। (ख) सूर्ये अस्तं गते सर्वे ब्रह्मचारिणः सन्ध्यार्थम् अगच्छन्। (ग) गुरौ आगते शिष्याः उत्तिष्ठन्ति।

**अभ्यासप्रश्नाः**

1. 1. आधारः कतिधा ? के च ते ?
2. अपादानाधिकरणसंज्ञा सूत्रं लिखित्वा वृत्तिं लिखत।
3. भयार्थानां त्राणार्थकानाञ्च धातूनां प्रयोगे का विभक्ति ?
4. निम्नलिखितानां सूत्राणां सोदाहरणं व्याख्या कार्या-
   i. आख्यातोपयोगे
   ii. पराजेरसोढः
   iii. भुवः प्रभवः
   iv. जनिकर्तुः प्रकृतिः

# एकादशः पाठः

# विसर्गसन्धिः

यत्र विसर्गस्य स्थाने सकाराद्यादेशाः भवन्ति अथवा कस्यचित् स्थाने विसर्गादेशो भवति स एव विसर्गसन्धिः। विसर्गमाश्रित्य विधीयमानः सन्धिः विसर्गसन्धिः।

**विसर्जनीयस्य सः** *(पा.सू. ८.३.३४)*

**पदविभागः -** विसर्जनीयस्य (षष्ठ्येकवचनम्), सः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** खरि परे विसर्गस्य स्थाने सः स्यात्। विष्णुस्त्राता।

**उदाहरणानि -** विष्णुः + त्राता = विष्णुस्त्राता (: = स्)

कृष्णः + छात्र = कृष्णश्छात्रः (: = श्)

छात्रः + षष्ठः = छात्रष्षष्ठः (: = ष्)

**शर्परे विसर्जनीयः** *(पा.सू. ८.३.३५)*

**पदविभागः -** शर्परे (सप्तम्येकवचनम्), विसर्जनीयः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** शर्परे खरि विसर्जनीयस्य विसर्जनीयः न त्वन्यत्। कः त्सरुः। घनाघनः क्षोभणः। इह यथायथं सत्वं जिह्वामूलीयश्च न।

**उदाहरणम् -** घनाघनः क्षोभणः, पयः क्षीरम्, घृतैः प्सातम्।

**वा शरि** *(पा.सू. ८.३.३६)*

**पदविभागः -** वा (अव्ययम्), शरि (सप्तम्येकवचवनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते, हरिश्शेते।

**उदाहरणानि -**

हरिः + शेते = हरिस् + शेते = हरिश्शेते/हरिः शेते (: = स्)

प्रजाभ्यः + स्वस्ति = प्रजाभ्यस् + स्वस्ति = प्रजाभ्यस्स्वस्ति/प्रजाभ्यः स्वस्ति।

**ससजुषो रुः** ***(पा.सू. ८.२.६६)***

**पदविभागः -** ससजुषोः (षष्ठीद्विवचनम्), रुः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** पदान्तस्य सस्य सजुषश्च रुः स्यात्।

**खरवसानयोर्विसर्जनीयः** *(पा.सू. ८.३.१५)*

**पदविभागः -** खरवसानयोः (सप्तमीद्विवचनम्), विसर्जनीयः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** खरि अवसाने च पदान्तस्य रेफस्य विसर्गः।

**उदाहरणम् -** शिशुः पिबति, राम+स् = राम+र् = रामर् = रामः।

**अतो रोरप्लुतादप्लुते** *(पा.सू. ६.१.११३)*

**पदविभागः -** अतः (पञ्चम्येकवचनम्), रोः (षष्ठ्येकवचनम्), अप्लुतात् (पञ्चम्येकवचनम्), अप्लुते (सप्तम्येकवचनम्)। चतुष्पदं सूत्रदमिदम्।

**वृत्तिः -** अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। शिवोऽर्च्यः।

**उदाहरणानि -** शिवस् + अर्च्यः = शिव रु + अर्च्यः(स् = रु) = शिव उ + अर्च्यः (रु = उ) = शिवो + अर्च्यः (अ+उ = ओ, आद्गुणः) = शिवोऽर्च्यः (ओ + अ = ओ, एङः पदान्तादति)

**हशि च** *(पा.सू. ६.१.११४)*

**पदविभागः -** हशि (सप्तम्येकवचनम्), च (अव्ययम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** अप्लुतादतः परस्य रोरुः स्याद्धशि। शिवो वन्द्यः। रोरित्युकारानुबन्धग्रहणान्नेह। प्रातरत्र। भ्रातर्गच्छ। देवास् इह इति स्थिते रुत्वम्।

**उदाहरणानि -** शिवस् + वन्द्यः = शिव रु + वन्द्यः = शिव उ + वन्द्यः = शिवो वन्द्यः (अ+उ = ओ, आद्गुणः) (१) बालो हसति (२) कृष्णो जयति (३) यतो धर्मः

**भोभगोअघोअपूर्वस्य योऽशि** *(पा.सू. ८.३.१७)*

**पदविभागः -** भोभगोअघोअपूर्वस्य (षष्ठ्येकवचनम्), यः (प्रथमैकवचनम्), अशि (सप्तम्येकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** भोपूर्वस्य भगोपूर्वस्य अघोपूर्वस्य अवर्णपूर्वस्य रोर्यादेशः स्यात् अशि परे।

**उदाहरणम् -** देवा इह, देवायिह। भोस् भगोस् अघोस् इति सान्ता निपाताः। तेषां रोर्यत्वे कृते।

**हलि सर्वेषाम्** *(पा.सू. ८३२२)*

**पदविभागः -** हलि (सप्तम्येकवचनम्), सर्वेषाम् (षष्ठीबहुवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** भोभगोअघोअपूर्वस्य यस्य लोपः स्याद् हलि।

**उदाहरणानि -** भो देवाः। भगो देवाः। भगो नमस्ते। अघो याहि।

**रोऽसुपि** *(पा.सू.८.२.६९)*

**पदविभागः -** रः (प्रथमैकवचनम्), असुपि (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** अह्नो रेफादेशः स्यात् न तु सुपि। रोरपवादः। अहरहः। अहर्गणः।

**उदाहरणानि -** अहन् + अहः = अहरु + अहः(न् = रु) = अहरहः।

(१) अहर्गणः (२) अहर्निशम् (३) अहोरात्रः (४) अहर्भाति।

**रो रि** *(पा.सू.८.३.१४)*

**पदविभागः -** रः (षष्ठ्येकवचनम्), रि (सप्तम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** रेफस्य रेफे परे लोपः स्यात्।

**ढ्रलोपे पूर्वस्य दीर्घोऽणः** *(६.३.१११)*

**पदविभागः -** ढ्रलोपे (सप्तम्येकवचनम्), पूर्वस्य (षष्ठ्येकवचनम्), दीर्घः (प्रथमैकवचनम्), अणः (षष्ठ्येकवचनम्)। चतुष्पदं सूत्रमिदम्।

**वृत्तिः -** ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः। पुनारमते। हरी रम्यः। शम्भू राजते।

**उदाहरणानि -** पुनर् + रमते = पुन + रमते (र् = लोपः 'रो रि') = पुना रमते (अ = आ)।

मनस् + रथः = मनरु + रथः = मन उ + रथः = मनोरथः (हशि च)

(१) हरी रम्यः (२) शम्भू राजते (३) विष्णू रक्षति (४) गुरू राति।

**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि** *(पा.सू. ६.१.१३२)*

**पदविभागः -** एतत्तदोः (षष्ठीद्विवचनम्), सुलोपः (प्रथमैकवचनम्), अकोः (षष्ठीद्विवचनम्), अनञ्समासे (सप्तम्येकवचनम्), हलि (सप्तम्येकवचनम्)। पञ्चपदमिदं सूत्रम्।

**वृत्तिः -** अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे। एष विष्णुः। स शम्भुः।

**उदाहरणानि -** एषसु + विष्णुः = एष + विष्णुः(सु = लोपः)। (१) स शम्भुः (२) स पठति (३) एष याति

**सोऽचि लोपे चेत्पादपूरणम्** *(पा.सू. ६.१.१३४)*

**पदविभागः -** सः (प्रथमैकवचनम्, षष्ठ्या विपरिणम्यते), अचि (सप्तम्येकवचनम्), लोपे (सप्तम्येकवचनम्), चेत् (अव्ययम्), पादपूरणम् (प्रथमैकवचनम्)। पञ्चपदं सूत्रमिदम्।

**वृत्तिः -** स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत।

**उदाहरणम् -** सैष दाशरथी रामः सैष राजा युधिष्ठिरः। सैष कर्णो महादानी सैष भीमो महाबलः॥

**अभ्यासप्रश्नाः**

1. 1. विसर्गस्य कति भेदाः भवन्ति ? के च ते ?

2. विसर्जनीयस्य सः इति सूत्रं सोदाहरणं स्पष्टयत।

3. निम्नाङ्कितानां पदानां ससूत्रं सिद्धि कार्या-

अ. शिवोऽर्च्यः आ. अहरहः इ. पुना पमते ई. हरिः शेते

4. निम्नलिखितानां सूत्राणां वृत्तिं लिखत-

अ. शर्परे विसर्जनीयः आ. वा शरि इ. हशि च ई. रो रि

उ. ढ्रलोपे पूर्वस्य दीर्घोऽणः

5. विद्या – विज्ञानविशारदा: के-के सन्ति ?

# द्वादशः पाठः

# उपसर्गाणां परिचयः षष्ठीविभक्तिश्च

**उपसर्गाः क्रियायोगे** *(पा.सू. १.४.५९)*

**वृत्तिः** - प्रादयः क्रियायोगे उपसर्गसंज्ञा स्युः।

उपसर्गाः द्वाविंशतिः सन्ति। ते च - प्र, परा, अप्, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप चैते प्रादयः। उपसर्गः धातोः पूर्वं भवति।

**उपसर्गेण धात्वर्थः बलादन्यत्र नीयते।**
**प्रहाराहारसंहारविहारपरिहारवत्॥**

## उपसर्गनियमाः

१. **उपसर्गः धातोः पूर्वं भवति।**

यथा - आ + गच्छति - **आगच्छति**

२. **उपसर्गेण कदाचिद् धातोः अर्थः परिवर्तते।**

यथा - स्मरति। विस्मरति।

३. **कदाचित् उपसर्गः धातोः अर्थस्य पोषणं करोति।**

यथा - शोभते। सुशोभते।

लिखति। विलिखति।

४. **कदाचित् धातोः पूर्वं द्वित्राः उपसर्गाः अपि भवन्ति।**

यथा - प्रति + आ + गच्छति - प्रत्यागच्छति
निर् + आ + करोति - निराकरोति
सम् + उत् + आ + हरति - समुदाहरति
वि + अव + स्थापयति - व्यवस्थापयति

५. **उपसर्गकारणात् कदाचित् परस्मैपदिधातुः आत्मनेपदिरूपम्, आत्मनेपदिधातुः परस्मैपदिरूपं च प्राप्नोति।**

यथा - (क) वि + जयति (परस्मैपदी) - विजयते (आत्मनेपदी)।
(ख) प्र + तिष्ठति (परस्मैपदी) - प्रतिष्ठते (आत्मनेपदी)।

(ग) वि + क्रीणाति (परस्मैपदी) - विक्रीणीते (आत्मनेपदी)।

(घ) वि + रमते (आत्मनेपदी) - विरमति (परस्मैपदी)

**धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।**

**तमेव विशिनष्ट्यन्यः उपसर्गगतिस्त्रिधा॥**

(क) कश्चित् उपसर्गः धात्वर्थं बाधते। गच्छति - आगच्छति

(ख) कश्चिदुपसर्गः धात्वर्थम् अनुवर्त्तते। वदति - अनुवदति

(ग) अन्यः उपसर्गः धात्वर्थं विशेषयति। वदति - प्रवदति।

## षष्ठीविभक्तिः

**षष्ठी शेषे** *(पा.सू. २.३.५०)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्), शेषे (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।

**उदाहरणानि -** (१) राज्ञः पुरुषः (२) दशरथस्य पुत्रः (३) अस्माकं भारतदेशः।

कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। (१) मातुः स्मरति। कर्मत्वस्य शेषत्वविवक्षायां मातृसम्बन्धिस्मरणम् इत्यर्थः। अत्र षष्ठी शेषे इति कर्मणः शेषत्वविवक्षायां षष्ठीविभक्तिर्भवति। (२) सतां गतम् (३) सर्पिषो जानीते।

**कर्तृकर्मणोः कृति** *(पा.सू. २.३.६५ )*

**पदविभागः -** कर्तृकर्मणोः (सप्तमीद्विवचनम्), कृति (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। गुणकर्मणि वेष्यते (वार्तिकम्)। नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा। कृति किम् ? तद्धिते मा भूत्, कृतपूर्वी कटम्।

**उदाहरणानि -** (क) कृष्णस्य कृतिः। (ख) रामस्य लेखः। (ग) गुरोः आगमनम्।

(घ) भोजनस्य परिवेषणम्। (ङ) लोकस्य सर्जकः ब्रह्मा। (च) देव्याः दर्शनम्।

**यतश्च निर्धारणम्** *(पा.सू. २.३.४१)*

**पदविभागः -** यतः (अव्ययम्), च (अव्ययम्), निर्धारणम् (प्रथमैकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा ब्राह्मणः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावञ्छीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः।

**उदाहरणानि -** (१) शिष्याणाम्/शिष्येषु अर्जुनः श्रेष्ठः। (२) गवां गोषु वा कृष्णा बहुक्षीरा।

**षष्ठी हेतुप्रयोगे** *(पा.सू. २.३.२३)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्), हेतुप्रयोगे (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति।

**उदाहरणम् -** अन्नस्य हेतोः वसति। अध्ययनस्य हेतोः काश्यां तिष्ठति। वेदाध्ययनस्य हेतोः महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानमधितिष्ठति।

**सर्वनाम्नस्तृतीया च** *(पा.सू. २.३.७३)*

**पदविभागः -** सर्वनाम्नः (षष्ठ्येकवचनम्), तृतीया (प्रथमैकवचनम्), च (अव्ययम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति। कस्य हेतोः। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् (वार्तिकम्)। किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय इत्यादि। एवं किं कारणम्, को हेतुः, किं प्रयोजनम् इत्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय इत्यादि।

**उदाहरणम् -** केन हेतुना वसति। कस्य हेतोः। किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय। प्रायग्रहणाद् असर्वनाम्नः प्रथमाद्वितीये न स्तः, ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय इत्यादि।

**षष्ठ्यतसर्थप्रत्ययेन** *(पा.सू. २.३.३०)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्), अतसर्थप्रत्ययेन (तृतीयैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** एतद्योगे षष्ठी स्यात्। दिक्शब्द.... (सू.) इति पञ्चम्याः अपवादः। ग्रामस्य दक्षिणतः पुरः पुरस्ताद् उपरि उपरिष्टात्।

**उदाहरणम् -** दक्षिणतो ग्रामस्य, उत्तरतो वेदपाठशालायाः, पुरस्तात् मन्दिरस्य, उपरि वृक्षस्य, उपरिष्टाद् यानस्य।

**तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्** *(पा.सू. २.३.७२)*

**पदविभागः -** तुल्यार्थैः (तृतीयाबहुवचनम्), अतुलोपमाभ्याम् (तृतीयाद्विवचनम्), तृतीया (प्रथमैकवचनम्), अन्यतरस्याम् (सप्तम्येकवचनम्)। चतुष्पदं सूत्रमिदम्।

**वृत्तिः -** तुल्यार्थैः योगे तृतीया वा स्यात्पक्षे षष्ठी। तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। अतुलोपमाभ्यां किम् ? तुला उपमा वा कृष्णस्य नास्ति।

**उदाहरणम्** - वेदेन वेदस्य वा तुल्यं ज्ञानं नास्ति। अर्जुनस्य अर्जुनेन वा सदृशः अन्यो धनुर्धारी नास्ति।

**अभ्यासप्रश्नाः**

1. कति उपसर्गाः भवन्ति ? तेषां नामानि लिखत।
2. श्रीरामस्य भार्यायाः नाम किम् ? तां क अपहृतवान् ?
3. तुल्यार्थे के विभक्ती भवतः ?
4. अधोलिखितानाम् उपसर्गाणां प्रयोगं कृत्वा वक्यानि रचयत-

   अ. उप आ. अधि इ. परि ई. आङ् उ. उप
5. निम्नलिखितानां सूत्राणां सोदाहरणं व्याख्या कर्या-

   अ. कर्तृकर्मणोः कृति

   आ. यतश्च निर्धारणम्

   इ. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्

# त्रयोदशः पाठः

## समासपरिचयः

'सम्' उपसर्गपूर्वकात् 'असु क्षेपणे' इत्यस्माद् धातोः 'घञ्' प्रत्यये कृते सति समासः इति रूपं निष्पद्यते। यस्यार्थो भवति बहूनां पदानां मिलित्वैकपदभवनम्।

❖ समासः परस्परान्वितयोः द्वयोः सुबन्तयोः अथवा बहूनां सुबन्तानां भवति। यथा - राज्ञः पुरुषः - राजपुरुषः। अत्र द्वयोः पदयोः परस्परान्वयोऽस्ति, अतः तयोः समासः विहितः अस्ति।

❖ समासे पूर्वत्र श्रूयमाणं पदं पूर्वपदमिति, उत्तरत्र श्रूयमाणं पदम् उत्तरपदमिति च व्यवह्रियते। समासे जाते पूर्वपदम् उत्तरपदञ्च प्रातिपदिकरूपेण स्थितं भवति। ततः समस्तात् पदात् विभक्तिः योजनीया।

**विग्रहः -** समासादेः अर्थं बोधयितुं यद् वाक्यमुच्यते तद् वाक्यं विग्रहः इत्यपि व्यवह्रियते। वृत्यर्थावबोधकं वाक्यं विग्रहः। स च लौकिकोऽलौकिकविग्रहश्चेति द्विधा।

**समासभेदाः -** समासः द्विधा केवलसमासः विशेषसमासश्चेति।

**केवलसमासः-** तत्पुरुषादिसंज्ञाविनिर्मुक्तः केवलसमासः। यथा- भूतपूर्वः। पूर्वं भूतः इति भूतपूर्वः।

**विशेषसमासः**

समासे पूर्वपदस्य उत्तरपदस्य च कश्चन अर्थो भवति। तत्र कदाचित् पूर्वपदार्थस्य प्राधान्यं भवति, कदाचित् उत्तरपदस्य प्राधान्यं भवति, कदाचित् द्वयोरपि पदार्थयोः प्राधान्यं भवति, पुनः कदाचित् द्वयोरपि पदार्थयोः प्राधान्यं न भवति। एवं पदार्थप्राधान्येन समासः चतुर्धा विभक्तोऽस्ति। ते च - अव्ययीभावः, तत्पुरुषः, बहुब्रीहिः, द्वन्द्वसमासश्च।

### अव्ययीभावसमासः

प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावसमासः। अव्ययीभावसमासः प्रायः (३३) त्रयस्त्रिंशत् भवन्ति। तेषु प्रसिद्धाः (१२) द्वादश। ते च सर्वे अव्ययपूर्वपदरूपेण, अव्ययोत्तररूपेण, अव्ययपदरहितरूपेण च त्रिधा विभज्यन्ते। तेषां क्रमेण उदाहरणानि यथा -

(क) उपकृष्णम् - कृष्णस्य समीपम् इति उपकृष्णम्। आचार्यस्य समीपम् इति उपाचार्यम्।

(ख) शाकप्रति - शाकस्य लेशः इति शाकप्रति।

(ग) पारेगङ्गम् - गङ्गायाः पारे इति पारेगङ्गम्। गङ्गायाः मध्ये इति मध्येगङ्गम्।

### तत्पुरुषसमासः

प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः। तत्पुरुषसमासः चतुर्धा यथा- सामान्यतत्पुरुषः, कर्मधारयः, द्विगुः, नञ् प्रभृतयश्चेति।

### सामान्यतत्पुरुषः सप्तधा

(क) प्रथमातत्पुरुषः - अर्धग्रामः - अर्धं ग्रामस्य इति अर्धग्रामः।

(ख) द्वितीयातत्पुरुषः - गृहगतः - गृहं गतः इति गृहगतः।

(ग) तृतीयातत्पुरुषः - नखभिन्नः - नखैः भिन्नः, इति नखभिन्नः।

(घ) चतुर्थीतत्पुरुषः - गोहितम् - गवे हितम् इति गोहितम्।

(ङ) पञ्चमीतत्पुरुषः - चोरभयम् - चोरात् भयम् इति चोरभयम्।

(च) षष्ठीतत्पुरुषः - 'वृक्षमूलम्' वृक्षस्य मूलम् इति वृक्षमूलम्।

(छ) सप्तमीतत्पुरुषः - कार्यकुशलः - कार्ये कुशलः इति कार्यकुशलः।

### कर्मधारयसमासः नवधा -

(क) विशेषणपूर्वपदकर्मधारयः - नीलमेघः - नीलो मेघः इति नीलमेघः।

(ख) विशेषणोत्तरपदकर्मधारयः - वैयाकरणखसूचिः - वैयाकरणः खसूचिः इति वैयाकरणखसूचिः।

(ग) विशेषणोभयपदकर्मधारयः - 'शीतोष्णम्' शीतम् उष्णम् इति शीतोष्णम्

(घ) उपमानपूर्वपदकर्मधारयः - मेघश्यामः - मेघः इव श्यामः इति मेघश्यामः

(ङ) उपमानोत्तरपदकर्मधारयः - नरव्याघ्रः - नरः व्याघ्रः इव इति नरव्याघ्रः

(च) अवधारणापूर्वपदकर्मधारयः - 'विद्याधनम्' विद्या एव धनम् इति विद्याधनम्

(छ) सम्भावनापूर्वपदकर्मधारयः - आम्रवृक्षः - आम्रः इति वृक्षः आम्रवृक्षः

(ज) मध्यमपदलोपकर्मधारयः - 'शाकपार्थिवः'शाकप्रियः पार्थिव इति शाकपार्थिवः।

(झ) मयूरव्यंसकादिकर्मधारयः - 'देशान्तरम्' अन्यो देशः इति देशान्तरम्। सूत्रान्तरम्, पाठान्तरम्।

### द्विगुसमासः त्रिधा -

(क) समाहारद्विगुः - त्रिलोकी - त्रयाणां लोकानां समाहारः इति त्रिलोकी

(ख) तद्धितार्थद्विगुः - षाण्मातुरः - षण्णां मातृणाम् अपत्यम् इति षाण्मातुरः

(ग) उत्तरपदद्विगुः - पञ्चगवधनः - पञ्च गावः धनं यस्य सः पञ्चगवधनः।

## नञ्प्रभृतयः पञ्चधा -

(क) नञ्समासः - अधर्मः - न धर्मः इति अधर्मः।

(ख) कुसमासः - कुपुरुषः - कुत्सितः पुरुषः इति कुपुरुषः।

(ग) गतिसमासः - शुक्लीकृत्य - अशुक्लं शुक्लं कृत्वा इति शुक्लीकृत्य।

(घ) उपपदसमासः - कुम्भकारः - कुम्भं करोति इति कुम्भकारः।

(ङ) प्रादिसमासः - प्राचार्यः - प्रगतः आचार्यः इति प्राचार्यः।

## बहुव्रीहिसमासः -

प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिसमासः।

बहुव्रीहिसमासः द्विधा- सामान्यबहुव्रीहिः विशेषबहुव्रीहिश्चेति। सामान्यबहुव्रीहिः षोढा-

(क) द्वितीयार्थबहुव्रीहिः - प्राप्तोदकः - प्राप्तम् उदकं यं सः प्राप्तोदकः (ग्रामः)

(ख) तृतियार्थबहुव्रीहिः - पीतक्षीरः - पीतं क्षीरं येन सः पीतक्षीरः (बालः)

(ग) चतुर्थ्यर्थबहुव्रीहिः - दत्तपशुः - दत्तः पशुः यस्मै सः दत्तपशुः (रुद्रः)

(घ) पञ्चम्यर्थबहुव्रीहिः - उद्धृतजलः - उद्धृतं जलं यस्मात् सः उद्धृतजलः (कूपः)

(ङ) षष्ठ्यर्थबहुव्रीहिः - पीताम्बरः - पीतम् अम्बरं यस्य सः पीताम्बरः (हरिः)

(च) सप्तम्यर्थबहुव्रीहिः - बहुफलः - बहूनि फलानि यस्मिन् सः बहुफलः (वृक्षः)

## विशेषबहुव्रीहिः नवधा -

(क) व्यधिकरणबहुव्रीहिः - चक्रपाणिः - चक्रं पाणौ यस्य सः चक्रपाणिः।

(ख) संख्योत्तरबहुव्रीहिः - उपविंशाः - विंशतेः समीपे ये सन्ति, ते उपविंशाः।

(ग) संख्योभयपदबहुव्रीहिः - द्वित्राः - द्वौ वा त्रयो वा इति द्वित्राः।

(घ) सहपूर्वपदबहुव्रीहिः - सशिष्यः - शिष्येण सह वर्तते इति सशिष्यः।

(ङ) नञ्बहुव्रीहिः - अपुत्रः - अविद्यमानः पुत्रः यस्य सः अपुत्रः।

(च) प्रादिबहुव्रीहिः - निष्कृपः - निर्गता कृपा यस्मात् सः निष्कृपः।

(छ) उपमानपूर्वपदबहुव्रीहिः - गजाननः - गजमिव आननं यस्य सः गजाननः।

(ज) व्यतिहारलक्षणबहुव्रीहिः - केशाकेशि - केशेषु केशेषु गृहीत्वा प्रवृत्तम् इदं युद्धम् इति केशाकेशि।

(झ) दिगन्तराललक्षणबहुव्रीहिः - दक्षिणपूर्वा - दक्षिणस्याः पूर्वस्याः दिशो यदन्तरालम् इति दक्षिणपूर्वा।

**द्वन्द्वसमासः -**

प्रायेण उभयपदार्थप्रधानो द्वन्द्वसमासः। द्वन्द्वसमासः द्विधा इतरेतरद्वन्द्वः समाहार-द्वन्द्वश्चेति। इतरेतरद्वन्द्वसमासः द्विधा।

द्विपदद्वन्द्वसमासः - रामश्च कृष्णश्च इति रामकृष्णौ।

बहुपदद्वन्द्वसमासः - हरिश्च हरश्च गुरुश्च इति हरिहरगुरवः।

**समाहारद्वन्द्वसमासः द्विधा -**

(क) समाहारद्वन्द्वः - संज्ञापरिभाषम् - संज्ञा च परिभाषा च अनयोः समाहार इति संज्ञापरिभाषम्।

(ख) नित्यसमाहारद्वन्द्वः - पाणिपादम् - पाणी च पादौ च एतेषां समाहारः इति पाणिपादम्।

**अभ्यासप्रश्नाः**

1. वृत्तिः कतिधा ? सोदाहरणं विवेचयत।
2. विग्रहस्य कति भेदाः ? के च ते ?
3. समासः कतिधा ? तेषां नामानि लिखत।
4. अव्ययीभाव-तत्पुरुष-द्वन्द्व-बहुव्रीहि-समासानाम् उदाहरणपुरस्सरं विवेचयत।
5. द्वन्द्वसमासस्य द्वौ प्रकारौ कौ ?

# चतुर्दशः पाठः

# जागरूको भव

# (वीथीनाटकम्)

- १ -

नाटककारः - आगच्छन्तु, आगच्छन्तु। वीथीनाटकम् आगच्छन्तु।

(कोलाहलः)

अर्जुनः - (मध्ये आगत्य) (लौकिकः प्रादेशिकभाषया एतम् अभिप्रायं प्रकटयेत्।) किं भोः, कः एषः भवतां कोलाहलः ? उच्चैः किं वदन्तः सन्ति भवन्तः ?

नाटककारः - आगच्छन्तु, आगच्छन्तु, संस्कृतेन वीथीनाटकम् अस्ति। सर्वे आगच्छन्तु।

अर्जुनः - किम् ? वीथीनाटकं वा ? तदपि संस्कृतेन ? गच्छतु रे, संस्कृतनाटकम् को वा ज्ञातुं शक्नुयात् ?

नाटककारः - तथा नास्ति भोः। नाटकं सरलभाषया भवति। सर्वेषाम् अर्थबोधोऽपि भवति।

अर्जुनः - एवं वा ? अस्तु तर्हि। अहमपि आगच्छामि।

नाटककारः - आगच्छन्तु ..... आगच्छन्तु ......।

- २ -

(नटनायकः गीतं गापयति। सर्वे नटाः गीतं गायन्ति। तदनुगुणं विवेकः अभिनयति।)

गीतम् - विवेकः गृहमागतः। अहो श्रान्तः ! अहो श्रान्तः !

कार्यमहो कार्यं कार्यालये, वेतनमल्पम्, आयः न्यूनम्, कुटुम्बभरणं बहुकष्टम्,

दिनमनुदिनमपि वर्धते मूल्यम्, पत्नीपुत्राः इच्छन्ति बहु बहु,

तण्डुलमानय, शाकम् आनय, तैलम् आनय, अत्यावश्यकवस्तूनि आनय,

वराकः एषः कुप्यति, खिद्यते, अन्ते रोदिति,

कष्टमहो कष्टम्, जीवनयात्रा बहु कष्टम्, कष्टम् अकटकटा ऽऽ कष्टम् अकटकटा ऽऽ

विवेकः - गीते ! गीते ! (द्वारशब्दं करोति। द्वारोद्घाटनस्य अभिनयः)

गणेशः - अहो, पितः ! आगच्छतु।

विवेकः - गणेशः ! भवतः माता कुत्र गतवती ?

गणेशः - कुत्रापि संस्कृतनाटकम् अस्ति, तत्र गतवती।

विवेकः - अस्तु, गणेशः, बुभुक्षा भवति। किञ्चित् काफी करोतु।

गणेशः - अस्तु, पश्यामि। (अन्तः गत्वा आगत्य) पितः ! एतत् स्वीकरोतु।

विवेकः - (पीत्वा) किमिदं काफी वा ? उष्णजलं वा ?

गणेशः - अहं किं करोमि ? गृहे शर्करा नास्ति। काफीचूर्णं नास्ति। क्षीरमपि नास्ति। कथं काफी करोमि ?

विवेकः - अस्तु, किं किं नास्ति इति वदतु। सर्वम् आनयामि।

गणेशः - श्रृणोतु, शर्करा नास्ति, गुडः नास्ति, तण्डुलः नास्ति, तैलं नास्ति, सूपः नास्ति, शाकः नास्ति, मृत्तैलं नास्ति......।

विवेकः - हूँ, (खेदम् अनुभूय) अस्तु, स्यूतम् आनयतु। सर्वाणि वस्तूनि आनयामि। गणेश ! एक विषयः। अद्य भवतः सन्दर्शनम् आसीत् किल ? किं जातम् ?

गणेशः - तत् किं भवति ? यः धनं ददाति सः उद्योगं प्राप्नोति। यस्य प्रभावः (इन्फ्लुयेन्स्) अस्ति सः अपि उद्योगं प्राप्नोति।

विवेकः - तर्हि भवान् एवं करोतु। मणिशङ्करः इति एकः मम स्नेहितोऽस्ति। सः राजकीये व्यवहारे अतीव निपुणः अस्ति। प्रभावी पुरुषश्च। भवान् तं पश्यतु, मम नाम वदतु। उद्योगः लभ्यते एव।

- ३ -

(आसन्दे मणिशङ्करः उपविष्टोऽस्ति। गणेशः प्रविशति।)

गणेशः - हरिः ओम् !, नमस्कारः।

मणिशङ्करः - को भवान् ?

गणेशः - अहं भवतः मित्रस्य पुत्रोऽस्मि।

मणिशङ्करः - इदानीम् अहं सचिवस्य साहाय्यकः अस्मि। अतः सर्वे 'भवतः मित्रस्य पुत्रः', 'भवतः मित्रस्य मित्रम्', 'भवतः मित्रस्य सहोदरः' इत्येवं वदन्तः मत्समीपम् आगच्छन्ति।

गणेशः - तथा न श्रीमन् ! मम पिता भवतः बाल्यमित्रं ..... सहाध्यायी च। समाने आसने उपवेशनम् आसीत् भवतोः। 'कर्मठरायः' इति तस्य नाम।

मणिशङ्करः - कर्मठराय ! क सः ? कस्यां कक्ष्यायां स मम सहाध्यायी आसीत् ?

गणेशः - अष्टमीकक्ष्यायाम्।

मणिशङ्करः - उन्नतः, कृष्णवर्णः, विशालनेत्रः .....

गणेशः - आम्, स एव।

मणिशङ्करः - आं स्मृतम्। तस्य पुत्रः वा भवान् ? बहु सन्तोषः। भवान् किं करोति ?

गणेशः - अहं M.A. पठितवान्। सुवर्णपदकमपि प्राप्तवान्। इदानीम् .......

मणिशङ्करः - उद्योगान्वेषणं करोति। एवं ननु ?

गणेशः - आम्। एकः उद्योगः अस्ति। यदि भवन्तः एकं वचनं वदन्ति..... किञ्चित् 'इन्फ्लुयन्स्' कुर्वन्ति चेत् ..... लभ्यते एव।

मणिशङ्करः - पश्यतु गणेश!, तदेकं न शक्यते। इदानीं काञ्चनं विना किमपि न सिध्यति। अहं सत्यं वदामि।

गणेशः - श्रीमन्, अहं निर्धनपुत्रः, निरुद्योगी च .....

मणिशङ्करः - पश्यतु गणेश!, इदानीं कालः तादृशः अस्ति। गतसप्ताहे मम कार्यालये एकः सेवकः उद्योगित्वेन स्वीकृतः। तेनैव अष्टसहस्रं रूप्यकाणि दत्तानि। एवं स्थिते .....

गणेशः - श्रीमन्, कृपया किञ्चित् .....

मणिशङ्करः - अस्तु इदानीं मध्यकालिकनिर्वाचनं घोषितम् अस्ति। भवान् एवं करोतु। अस्माकं पक्षस्य प्रचारकार्यं करोतु। भोजनादिकं मम गृहे एव करोतु। निर्वाचनानन्तरम् उद्योगविषये किमपि चिन्तयामः।

**अभ्यासप्रश्नाः**

1. गणेशस्य पितुः नाम किम् ?
2. गणेशस्य गृहे किं किं नास्ति ?
3. विवेकस्य अभिमुखं क आगच्छति तथा किमर्थम् ?
4. मणिशङ्करः कः ?

भवति भवति भवति भवति भवति भवति

भवति भवति भवति भवति भवति भवति

भवति भवति भवति भवति भवति भवति

खादतु खादतु खादतु खादतु खादतु खादतु

खादतु खादतु खादतु खादतु खादतु खादतु

खादतु खादतु खादतु खादतु खादतु खादतु

पठिष्यति पठिष्यति पठिष्यति पठिष्यति

पठिष्यति पठिष्यति पठिष्यति पठिष्यति

पठिष्यति पठिष्यति पठिष्यति पठिष्यति

लिखेत् लिखेत् लिखेत् लिखेत् लिखेत् लिखेत्

लिखेत् लिखेत् लिखेत् लिखेत् लिखेत् लिखेत्

लिखेत् लिखेत् लिखेत् लिखेत् लिखेत् लिखेत्

अवदत् अवदत् अवदत् अवदत् अवदत् अवदत्

अवदत् अवदत् अवदत् अवदत् अवदत् अवदत्

अवदत् अवदत् अवदत् अवदत् अवदत् अवदत्

राम: विद्यालयं गच्छति । राम: विद्यालयं गच्छति ।

राम: विद्यालयं गच्छति । राम: विद्यालयं गच्छति ।

राम: विद्यालयं गच्छति । राम: विद्यालयं गच्छति ।

राम: विद्यालयं गच्छति । राम: विद्यालयं गच्छति ।

त्वं भोजनं कुरु । त्वं भोजनं कुरु ।

त्वं भोजनं कुरु । त्वं भोजनं कुरु ।

त्वं भोजनं कुरु । त्वं भोजनं कुरु ।

त्वं भोजनं कुरु । त्वं भोजनं कुरु ।

अहं पाठं अपठम् । अहं पाठं अपठम् ।

अहं पाठं अपठम् । अहं पाठं अपठम् ।

अहं पाठं अपठम् । अहं पाठं अपठम् ।

अहं पाठं अपठम् । अहं पाठं अपठम् ।

बालका: पुस्तकानि पठन्तु । बालका: पुस्तकानि पठन्तु ।

बालका: पुस्तकानि पठन्तु । बालका: पुस्तकानि पठन्तु ।

बालका: पुस्तकानि पठन्तु । बालका: पुस्तकानि पठन्तु ।

बालका: पुस्तकानि पठन्तु । बालका: पुस्तकानि पठन्तु ।

# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

## माध्यमेन सञ्चालिता प्रस्ताविता च राष्ट्रीयादर्शवेदविद्यालयः





**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)**

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in